www.thearyasamaj.org

# Teach Yourself Samskrit

## संस्कृतस्वाध्यायः

## प्रथमा दीक्षा

# वाक्यविस्तरः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय संस्कृत संस्थानम्
नव देहली

www.thearyasamaj.org

# Teach Yourself Samskrit

## संस्कृत-स्वाध्यायः

### प्रथमा दीक्षा

# वाक्यविस्तरः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

www.thearyasamaj.org

प्रकाशकः - कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया
जनकपुरी, नवदेहली - 110 058
दूरभाषः 28524993, 28521994, 28524995, 28520977
टेलीफैक्सः 28524532, 28524387, 28520976
E-mail: rsks@nda.vsnl.net.in
rskssale@yahoo.com
website: www.sanskrit.nic.in


| | | | | |
|---|---|---|---|---|
| प्रथमसंस्करणम् | जनवरी, | २००२ | १,००० | प्रतयः |
| प्रथमपुनर्मुद्रणम् | अगस्त्, | २००२ | ४,००० | प्रतयः |
| द्वितीयपुनर्मुद्रणम् | अगस्त्, | १००३ | १,००० | प्रतयः |
| तृतीयपुनर्मुद्रणम् | नवम्बर, | २००३ | ३०,००० | प्रतयः |
| चतुर्थपुनर्मुद्रणम् | दिसम्बर, | २००३ | २०,००० | प्रतयः |
| पञ्चमपुनर्मुद्रणम् | मार्च, | २००४ | ५०,००० | प्रतयः |
| षष्ठपुनर्मुद्रणम् | दिसम्बर्, | २००७ | २०,००० | प्रतयः |
| सप्तमपुनर्मुद्रणम् | जुलै, | २००९ | ५,००० | प्रतयः |
| अष्टमपुनर्मुद्रणम् | सितम्बर, | २०१० | ५,००० | प्रतयः |
| नवमपुनर्मुद्रणम् | दिसम्बर, | २०११ | ७,००० | प्रतयः |
| दशमपुनर्मुद्रणम् | सितम्बर, | २०१२ | १०,००० | प्रतयः |


© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

ISBN -81-86111-01-8

मूल्यम् - 200/-रूप्यकाणि (गुच्छस्य)

मुद्रकः
ग्राफिक् वर्ल्ड
1659-62 दखणीरायमार्गः,
दरियागञ्ज, देहली - 110 002
E-mail: graphicworld@rediffmail.com

www.thearyasamaj.org

# संस्कृतस्वाध्यायः

## प्रथमा दीक्षा

### मार्गदर्शकसमितिः

प्रो० श्रीधर वसिष्ठः
श्री चमू. कृष्णशास्त्री
श्रीमती शशिप्रभा गोयल
डा० विश्वासः

प्रो० के. वि. रामकृष्णमाचार्यः
डा० चाँद किरण सलूजा
श्री जनार्दन हेगडे
डा० रा. देवनाथन्

### सहसम्पादकाः

ललित कुमार त्रिपाठी
वाई.एस. रमेशः
सुकान्त कुमार सेनापतिः
वनमाली बिश्वालः

### सहयोगिनः

चित्रकारः - कल्लोल मजूमदार
चित्रसज्जाकारौ - ब्रह्म बसेटिया
विजय बसेटिया

सहचित्रकारः - भास्कर सिन्हा
अक्षरसंयोजकः - जवाहर लाल गुप्त

www.thearyasamaj.org

# विषयानुक्रमणी


| पाठः | विषयः | पाठ्य बिन्दुः | पृष्ठसंख्या |
|---|---|---|---|
| 1. प्रथमः पाठः | 'मम गृहम्' | एषः / एषा / एतत् | 1-3 |
| 2. द्वितीयः पाठः | 'उत्तमः छात्रः' | वर्तमानकाले प्रथमपुरुषः - ति / तः / अन्ति | 4-6 |
| 3. तृतीयः पाठः | 'वयं मिलामः' | अहम् / आवाम् / वयम्<br>त्वम् / युवाम् / यूयम् | 7-8 |
| 4. चतुर्थः पाठः | 'सज्जनौ रामसोमौ' | एतौ / तौ | 9-10 |
| 5. पञ्चमः पाठः | 'वर्षाकालः' | बहुवचनम् | 11-12 |
| 6. षष्ठः पाठः | 'मथुरायात्रा' | भवान् / भवन्तौ / भवन्तः<br>भवती / भवत्यौ / भवत्यः | 13-14 |
| 7. सप्तमः पाठः | 'प्रश्नोत्तराणि' | प्रश्नवाचकाः | 15-17 |
| 8. अष्टमः पाठः | 'मम दिनचर्या' | समयः - घटिकायन्त्रेण | 18-20 |
| 9. नवमः पाठः | 'विवेकयुक्तः मीनः' | अस्-धातुः, वर्त्तमानकालः | 21-22 |
| 10. दशमः पाठः | 'वयं भारतीयाः' | अस्-धातुः, वर्त्तमानकाले त्रिषु पुरुषेषु | 23-24 |
| 11. एकादशः पाठः | 'विद्यालयः' | द्वितीया | 25-30 |
| 12. द्वादशः पाठः | 'गीतानि शृणोमि' | शृणोति / ददाति / करोति | 31-34 |
| 13. त्रयोदशः पाठः | 'वस्त्राणि क्रीणामि' | क्रीणाति / जानाति | 35-37 |
| 14. चतुर्दशः पाठः | 'उपदेशः' | लोट् - मध्यम-पुरुषे | 38-43 |
| 15. पञ्चदशः पाठः | 'वीराङ्गना लक्ष्मीबाई' | लङ्-लकारः, भूतकालः | 44-47 |
| 16. षोडशः पाठः | 'ग्रीष्मावकाशः' | लङ्-लकारः, भूतकालः | 48-50 |
| 17. सप्तदशः पाठः | 'कोणार्कः' | क्तवतु-प्रत्ययः | 51-57 |
| 18. अष्टादशः पाठः | 'राणाप्रतापः' | भविष्य-कालः | 58-60 |

www.thearyasamaj.org


| पाठः | विषयः | पाठ्य बिन्दुः | पृष्ठसंख्या |
|---|---|---|---|
| 19. एकोनविंशः पाठः | 'महीशूरपुरं प्रति प्रवासः' | क्त्वा / ल्यप् | 61–64 |
| 20. विंशः पाठः | 'गुरुकुलम्' | तुमुन् | 65–67 |
| 21. एकविंशः पाठः | 'जन्तुशाला' | तृतीया–विभक्तिः | 68–75 |
| 22. द्वाविंशः पाठः | 'काशी' | चतुर्थी–विभक्तिः | 76–82 |
| 23. त्रयोविंशः पाठः | 'आश्रमः' | पञ्चमी–विभक्तिः | 83–89 |
| 24. चतुर्विंशः पाठः | 'संस्कृतभाषा' | षष्ठी–विभक्तिः | 90–96 |
| 25. पञ्चविंशः पाठः | 'रथयात्रा' | सप्तमी–विभक्तिः | 97–103 |

www.thearyasamaj.org

# 1. प्रथमः पाठः

## मम गृहम्

एषः / एषा / एतत्




मम नाम गोविन्दः ।

एतत् मम गृहम् ।

एषः मम तातः ।

एषा अम्बा ।



एषः महानसः ।

एतौ घटौ ।

एते चषकाः ।

एषा स्थालिका ।

एते अग्निपेटिके ।

एताः छुरिकाः ।



एतत् उद्यानम् ।

एते फले ।

एतानि पुष्पाणि ।

एषा लता ।

एते मल्लिकालते ।

एताः कुल्याः ।



एषः कः ?

एषः हारः ।

एतौ कौ ?


एतौ हस्तौ ।

एते के ?

एते नखाः ।

www.thearyasamaj.org






एषा का ?


एषा सञ्चिका।

एते के ?

एते पत्रिके।

एताः काः ?

एताः शाटिकाः।



एतत् किम् ?

एतत् मुखम्।

एते के ?

एते नेत्रे।

एतानि कानि ?

एतानि कङ्कणानि।

📖 **ध्यानेन पठन्तु–**

('एतत्'– शब्दः)

| | एक0 | द्वि0 | बहु0 |
|---|---|---|---|
| पुं0 | एषः | एतौ | एते |
| स्त्री0 | एषा | एते | एताः |
| नपुं0 | एतत् | एते | एतानि |

('किम्'– शब्दः)

| एक0 | द्वि0 | बहु0 |
|---|---|---|
| कः | कौ | के |
| का | के | काः |
| किम् | के | कानि |

## अभ्यासः – 1

**I. योजयन्तु–**

| (अ) | (आ) |
|---|---|
| 1. एषः | 1. छुरिकाः |
| 2. एषा | 2. उद्यानम् |
| 3. एतत् | 3. महानसः |
| 4. एतानि | 4. हस्तौ |
| 5. एतौ | 5. कङ्कणानि |
| 6. एताः | 6. बालिका |

www.thearyasamaj.org



II. प्रथमस्य उत्तरानुगुणं पाठानुसारं द्वितीयप्रश्नसमूहस्य उत्तरं लिखन्तु–

| | प्रश्नः | उत्तरम् | प्रश्नः | उत्तरम् | |
|---|---|---|---|---|---|
| 1. | एषः कः ? | एषः हारः। | एषा का ? | ............ | ............ |
| 2. | एषः कः ? | एषः घटः। | एतौ कौ ? | ............ | ............ |
| 3. | एषा का ? | एषा सञ्चिका। | एते के ? | ............ | ............ |
| 4. | एतौ कौ ? | एतौ हस्तौ। | एते के ? | ............ | ............ |
| 5. | एतत् किम् ? | एतत् नेत्रम्। | एते के ? | ............ | ............ |

III. अग्रे निर्दिष्टानां शब्दानां वचनं निर्दिशन्तु–

उदा०- एषः एकवचनम्

| | | | | | |
|---|---|---|---|---|---|
| 1. | एषा | ............ | 6. | कौ | ............ |
| 2. | एतानि | ............ | 7. | एतौ | ............ |
| 3. | एतत् | ............ | 8. | काः | ............ |
| 4. | कः | ............ | 9. | एते | ............ |
| 5. | कानि | ............ | 10. | एताः | ............ |

IV. योजयन्तु–

| (अ) | (आ) |
|---|---|
| 1. एतत् पुस्तकम् | 1. पुंलिङ्गबहुवचनम् |
| 2. एते बालकाः | 2. स्त्रीलिङ्गबहुवचनम् |
| 3. एतौ कौ ? | 3. नपुंसकबहुवचनम् |
| 4. एताः काः ? | 4. स्त्रीलिङ्ग–एकवचनम् |
| 5. एषा सञ्चिका | 5. नपुंसक–एकवचनम् |
| 6. एतानि कङ्कणानि | 6. पुंलिङ्गद्विवचनम् |

www.thearyasamaj.org

# 2. द्वितीयः पाठः

## उत्तमः छात्रः

**वर्त्तमानकाले प्रथमपुरुषः— ति/तः/अन्ति**

एषः राजेशः ।

राजेशः उत्तमः छात्रः ।

एषः प्रतिदिनं प्रातः शीघ्रम् **उत्तिष्ठति** ।

स्नानं **करोति** ।

देवं **नमति** ।

पाठं **पठति** ।

अल्पाहारं **स्वीकरोति**, विद्यालयं **गच्छति** ।

राजेशस्य मित्रं राकेशः । एतौ सह पठतः ।





विद्यालये अनेके शिक्षकाः **सन्ति** ।

ते सम्यक् **पाठयन्ति** । नीतिम् **उपदिशन्ति** ।

छात्राः श्रद्धया **पठन्ति** ।

स्वल्पकालं **क्रीडन्ति** ।



राजेशः सायं गृहम् **आगच्छति** ।

गृहपाठं **लिखति** । भोजनं **करोति** ।

दूरदर्शनं **पश्यति**, ततः पश्चात् शयनं **करोति** ।

www.thearyasamaj.org



📖 ध्यानेन पठन्तु–

| | | | | |
|---|---|---|---|---|
| बालः | बालौ | बालाः | → | गच्छति, गच्छतः, गच्छन्ति |
| बाला | बाले | बालाः | | |
| यानम् | याने | यानानि | | |

---

## अभ्यासः– 2

I. यथोचितं मेलयित्वा वाक्यरूपेण लिखन्तु–

| | |
|---|---|
| बालः | गच्छतः । |
| बालौ | गच्छति । |
| बालाः | गच्छति । |
| बाला | गच्छन्ति । |

यथा– ......बालः...... ......गच्छति...... ।

.................... .................... ।

.................... .................... ।

.................... .................... ।

II. राजेशस्य कार्याणि क्रमेण लिखन्तु–

1. राजेशः प्रातः उत्तिष्ठति ।
2. राजेशः स्नानं .................... ।
3. राजेशः पाठं .................... ।
4. राजेशः अल्पाहारं .................... ।
5. राजेशः विद्यालयं .................... ।
6. राजेशः सायं .................... .................... ।
7. राजेशः दूरदर्शनं .................... ।
8. राजेशः शयनं .................... ।

www.thearyasamaj.org



## III. अन्यत् रूपद्वयं लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| उदा०– | 1. | उत्तिष्ठति | उत्तिष्ठतः | उत्तिष्ठन्ति |
| | 2. | उपविशति | .................... | .................... |
| | 3. | लिखति | .................... | .................... |
| | 4. | क्रीडति | .................... | .................... |
| | 5. | नयति | .................... | .................... |
| | 6. | हसति | .................... | .................... |
| | 7. | .................... | खादतः | .................... |
| | 8. | .................... | पिबतः | .................... |
| | 9. | .................... | पृच्छतः | .................... |
| | 10. | .................... | धरतः | .................... |
| | 11. | .................... | .................... | मिलन्ति |
| | 12. | .................... | .................... | तिष्ठन्ति |
| | 13. | .................... | .................... | स्मरन्ति |
| | 14. | .................... | .................... | नयन्ति |

## IV. रेखया सम्बन्धं सूचयन्तु–

*यथा*– बालकः / बालकाः पठति / पठन्ति

1. राजेशः / छात्राः पठन्ति / पठति
2. छात्रः / छात्राः क्रीडति / क्रीडन्ति
3. बालकः / बालकाः पश्यति / पश्यन्ति
4. शिक्षकः / शिक्षकाः पाठयन्ति / पाठयति

www.thearyasamaj.org

# 3. तृतीयः पाठः

## वयं मिलामः

अहम् / आवाम् / वयम्
त्वम् / युवाम् / यूयम्

*परिचयः*–

| | | |
|---|---|---|
| *आनन्दः* | – | तव नाम किम् ? |
| *राजीवः* | – | मम नाम राजीवः। तव नाम .................................. ? |
| *आनन्दः* | – | मम नाम आनन्दः। |
| *राजीवः* | – | त्वं कुत्र गच्छसि ? |
| *आनन्दः* | – | अहम् आपणं गच्छामि। एषः मम अनुजः सन्तोषः। |
| *राजीवः* | – | युवां पठथः किम् ? |
| *आनन्दः* | – | आम्, आवां पठावः। त्वं कुत्र गच्छसि ? |
| *राजीवः* | – | अहमपि आपणमेव गच्छामि। |
| *आनन्दः* | – | सर्वे मिलित्वा गच्छामः। |
| *आपणिकः* | – | यूयं किम् इच्छथ ? |
| *सर्वे* | – | वयं पुस्तकानि इच्छामः। |
| *आपणिकः* | – | एतानि पुस्तकानि पश्यत। |

---

### अभ्यासः– 3

I. रिक्तस्थानानि पूरयन्तु–

| | | |
|---|---|---|
| 1 एषः | 2 एतौ | 3 एते |
| 4 त्वम् | 5 युवाम् | 6 यूयम् |
| 7 अहम् | 8 आवाम् | 9 वयम् |

| | | |
|---|---|---|
| 1 गच्छति | 2 गच्छतः | 3 गच्छन्ति |
| 4 गच्छसि | 5 गच्छथः | 6 गच्छथ |
| 7 गच्छामि | 8 गच्छावः | 9 गच्छामः |

यथा– एषः गच्छति ।

एतौ गच्छतः ।

1. त्वं ................................ ।

2. युवां ................................ ।

www.thearyasamaj.org



एते ....गच्छन्ति.... ।

3. यूयं .................. ।

4. अहं .................. ।

5. आवां .................. ।

6. वयं .................. ।

II. कोष्ठे प्रदत्तस्य शब्दस्य साहाय्येन उत्तराणि लिखन्तु-

1. तव नाम किम् ? .................. .................. .................. (गोविन्द) ।
2. त्वं कुत्र गच्छसि ? .................. .................. (विद्यालय) .................. ।
3. त्वं किं करोषि ? .................. .................. (पत्र) .................. (लिख्) ।
4. यूयं किम् इच्छथ ? .................. .................. (विद्या) .................. ।
5. युवां पठथः किम् ? ....आम्.... .................. .................. ।

III. उत्तरवाक्यानां प्रश्नवाक्यानि लिखन्तु-

प्र० .................. .................. .................. ?

1. उ० मम नाम राजेशः ।

प्र० .................. .................. .................. ?

2. उ० आम्, आवां लिखावः ।

प्र० .................. .................. .................. ?

3. उ० आम्, अहं पठामि ।

प्र० .................. .................. .................. ?

4. उ० अहं मन्दिरं गच्छामि ।

प्र० .................. .................. ?

5. उ० एषः मम अनुजः ।

www.thearyasamaj.org

# 4. चतुर्थः पाठः

## सज्जनौ रामसोमौ

एतौ / तौ

एषः रामः। एतस्य सहोदरः सोमः। **एतौ** सर्वदा सहैव भवतः। प्रतिदिनं प्रातः सहैव विद्यालयं गच्छतः। तत्र पाठं सहैव पठतः। सायं सहैव विद्यालयतः प्रत्यागच्छतः।

एकदा **तौ** मार्गे एकं धनस्यूतं प्राप्नुतः। तम् आरक्षकालयं नयतः। तयोः व्यवहारेण आरक्षकाधिकारी सन्तुष्टः। "**एतौ** सज्जनौ स्तः। परधनं न इच्छतः। अतः एतयोः कृते पारितोषिकं ददामि" इति वदति।

किन्तु **तौ** 'पारितोषिकं मास्तु' इति वदतः। गृहं प्रत्यागच्छतः। जननी जनकः च तयोः प्रशंसां कुरुतः।

ध्यानेन पठन्तु–

| एक० | द्वि० | बहु० | एक० | द्वि० | बहु० |
|---|---|---|---|---|---|
| छात्रः | छात्रौ | छात्राः | गच्छति | गच्छतः | गच्छन्ति |
| एषः | एतौ | एते | क्रीडति | क्रीडतः | क्रीडन्ति |
| एषा | एते | एताः | पठति | पठतः | पठन्ति |
| कः | कौ | के | लिखति | लिखतः | लिखन्ति |
| का | के | काः | हसति | हसतः | हसन्ति |

www.thearyasamaj.org



## अभ्यासः– 4

I. उत्तराणि लिखन्तु–

1. रामस्य सहोदरः कः ? 1. ............................................................ ।
2. तौ प्रातः किं कुरुतः ? 2. ............................................................ ।
3. तौ धनस्यूतं कुत्र नयतः ? 3. ............................................................ ।
4. तौ किं न इच्छतः ? 4. ............................................................ ।

II. एतानि रूपाणि वचनशः लिखन्तु–

पठति, नयतः, पाठयन्ति, पठन्ति, इच्छतः, गच्छति, गच्छतः, आगच्छति, वदतः, क्रीडन्ति, भवतः, भवन्ति, उपदिशन्ति

| एक० | द्वि० | बहु० |
|---|---|---|
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| | ............ | ............ |
| | ............ | ............ |

III. गणे असमानं रूपं रेखाङ्कनेन पृथक्कुर्वन्तु–

| | | | | |
|---|---|---|---|---|
| 1. | पठति | लिखति | गच्छतः | गच्छति |
| 2. | नयतः | कुर्वन्ति | वदतः | भवतः |
| 3. | क्रीडन्ति | क्रीडति | पठन्ति | वदन्ति |
| 4. | आगच्छतः | प्राप्नुतः | कुरुतः | गच्छन्ति |

www.thearyasamaj.org

# 5. पञ्चमः पाठः

## वर्षाकालः

बहुवचनम्

वर्षाकाले गगने मेघाः **भवन्ति**। ते **गर्जन्ति**। सौदामिन्यः **स्फुरन्ति**। सर्वत्र जलं भवति। ग्रामे मार्गाः पङ्कमयाः **भवन्ति**। वर्षाकाले मण्डूकाः **रटन्ति**। मयूराः **नृत्यन्ति**। वृक्षाः पल्लविताः **भवन्ति**। बीजानि अङ्कुरितानि **भवन्ति**। क्षेत्राणि जलपूर्णानि सस्यसमृद्धानि च **भवन्ति**। कृषकाः कृषिं **कुर्वन्ति**। ते क्षेत्रेषु बीजानि **वपन्ति**। सस्यानि **वर्धयन्ति**। ते प्रसन्नाः **भवन्ति**।

वर्षाकाले जलाशयाः पूर्णाः **भवन्ति**। कूपाः अपि पूर्णाः **भवन्ति**। नद्यः जलेन परिपूर्णाः भवन्ति। वर्षाकाले जनाः छत्रं धृत्वा **गच्छन्ति**। बालकाः नौकाः निर्माय कुल्यासु **प्लावयन्ति**। वृष्टिकारणतः देशस्य धान्यसमृद्धिः अधिका भवति। वृष्टिः देशस्य जीवननाडी अस्ति।

### अभ्यासः– 5

I. पाठमाश्रित्य प्रश्नानाम् उत्तराणि लिखन्तु–

(अ) वर्षाकाले गगने के भवन्ति ?

........................................................................................................ ।

(आ) वर्षाकाले मार्गाः कथं भवन्ति ?

........................................................................................................ ।

(इ) वर्षाकाले बालाः किं कुर्वन्ति ?

........................................................................................................ ।

(ई) वृष्टिकारणतः का अधिका भवति ?

........................................................................................................ ।

II. योजयन्तु–

| | अ | आ |
|---|---|---|
| (1) | मण्डूकाः | गर्जन्ति |
| (2) | मयूराः | स्फुरन्ति |
| (3) | सौदामिन्यः | जीवननाडी |
| (4) | मेघाः | नृत्यन्ति |
| (5) | वृष्टिः | रटन्ति |

www.thearyasamaj.org



III. पाठानुसारं रिक्तस्थानानि पूरयन्तु–

(1) वर्षाकाले बीजानि ........................ ........................ ।

(2) वर्षाकाले कृषकाः बीजानि ........................ ।

(3) वर्षाकाले कूपाः ........................ ........................ ।

(4) वर्षाकाले नद्यः ........................ ........................ ........................ ।

(5) ........................ ........................ जीवननाडी ........................ ।

IV. उदाहरणानुसारम् अधोनिर्दिष्टानाम् एकवचन–द्विवचन–बहुवचनरूपाणि लिखन्तु–

यथा–(1) रट् ......रटति...... ......रटतः...... ......रटन्ति......

(2) नृत्य् ........................ ........................ ........................

(3) भव् ........................ ........................ ........................

(4) प्लावय् ........................ ........................ ........................

(5) गर्ज् ........................ ........................ ........................

V. शुद्धं "✓" चिह्नेन अशुद्धं "✖" चिह्नेन च सूचयन्तु–

(1) वर्षाकाले वृक्षाः शुष्यन्ति । (..............)

(2) वर्षाकाले मेघाः पतन्ति । (..............)

(3) वर्षाकाले कृषकाः प्रसन्नाः भवन्ति । (..............)

(4) वर्षाकाले सौदामिन्यः स्फुरन्ति । (..............)

(5) वर्षाकाले सर्पाः नृत्यन्ति । (..............)

VI. रिक्तस्थाने उचितं पदं लिखन्तु–

(1) वर्षाकाले अहं ........................ भवामि । (खिन्नः / प्रसन्नः)

(2) वर्षाकालः देशस्य ........................ । (पोषकः / कष्टकारकः)

(3) वर्षाकाले ........................ न भवति । (घर्मः / शैत्यम्)

(4) वर्षाकालः विलासप्रियाणां ........................ । (प्रियः / अप्रियः)

(5) मृत्तिकाजलयोः मिश्रणेन ........................ उत्पन्नः भवति । (मेघः / पङ्कः)

www.thearyasamaj.org

# 6. षष्ठः पाठः

## मथुरायात्रा

भवान् / भवन्तौ / भवन्तः
भवती / भवत्यौ / भवत्यः

भगवान् श्रीकृष्णः गोकुले आसीत्। तदा अक्रूरः तत्र आगच्छति। सः वदति– "हे कृष्ण! भवान् मथुराम् आगच्छतु। मातुलः कंसः आयुधपूजार्थम् आह्वयति" इति।

अक्रूरः वदति "**भवन्तौ** सज्जौ भवताम्। अहं रथम् आनयामि।"

सः रथम् आनयति। तदा गोपिकाः तत्र आगच्छन्ति। ताः कृष्णं वदन्ति– "कृष्ण ! **भवान्** मथुरां मा गच्छतु। अत्र एव तिष्ठतु। अन्यथा अस्मान् अपि मथुरां नयतु।"

कृष्णः वदति– "**भवत्यः** अत्र एव भवन्तु । स्वकार्याणि कुर्वन्तु।" सः राधां वदति – "**भवती** चिन्तां मा करोतु। अहं शीघ्रं प्रत्यागच्छामि।"

गोपाः अपि तत्र आगच्छन्ति। तदा बलरामः तान् वदति– "**भवन्तः** निश्चिन्ताः भवन्तु। स्वकर्तव्यानि निर्वहन्तु। आवां शीघ्रं प्रत्यागच्छावः" इति।

यशोदां रोहिणीं च नमस्कृत्य तौ वदतः– "**भवत्यौ** दुःखं मा कुरुताम्। आवां सुखेन प्रत्यागच्छावः" ततः सर्वान् नमस्कृत्य तौ रथेन मथुरां गच्छतः।

---

### अभ्यासः– 6

I. रिक्तस्थानानि पूरयन्तु–

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | भवान् | बालकः। | भवन्तौ | बालकौ। | भवन्तः | बालकाः। |
| | भवान् | युवकः। | .......... | ..........। | .......... | ..........। |
| | .......... | सुन्दरः। | .......... | ..........। | .......... | ..........। |
| | .......... | सुशीलः। | .......... | ..........। | .......... | ..........। |
| | .......... | गायकः। | .......... | ..........। | .......... | ..........। |
| | .......... | वैद्यः। | .......... | ..........। | .......... | ..........। |
| | .......... | शिक्षकः। | .......... | ..........। | .......... | ..........। |

www.thearyasamaj.org


## II. रिक्तस्थानानि पूरयन्तु–

| | | | | | |
|---|---|---|---|---|---|
| उदा० – भवती | बालिका । | भवत्यौ | बालिके । | भवत्यः | बालिकाः । |
| ........ | शिक्षिका । | ........ | ........ । | ........ | ........ । |
| ........ | चतुरा । | ........ | ........ । | ........ | ........ । |
| ........ | वैद्या । | ........ | ........ । | ........ | ........ । |
| ........ | ग्राहिका । | ........ | ........ । | ........ | ........ । |
| ........ | गायिका । | ........ | ........ । | ........ | ........ । |

## III. 'भवत्'–शब्दयुक्तानि वाक्यानि लिखन्तु–

उदा० – (1) त्वं (पुं०) करोषि । भवान् करोति ।

(2) त्वं (पुं०) पाठं पठसि । ................................ ।

(3) त्वं (स्त्री०) तिलकं धरसि । ................................ ।

(4) त्वं (स्त्री०) पाकं करोषि । ................................ ।

(5) त्वं (पुं०) कथां लिखसि । ................................ ।

(6) यूयं (पुं०) देवं नमथ । ................................ ।

(7) यूयं (स्त्री०) नगरं गच्छथ । ................................ ।

(8) युवां (पुं०) कुत्र गच्छथः ? ................................ ।

(9) युवां (पुं०) नृत्यं पश्यथः । ................................ ।

(10) युवां (स्त्री०) कवितां लिखथः । ................................ ।

(11) युवां (स्त्री०) पुष्पाणि जिघ्रथः । ................................ ।

(12) युवाम् (स्त्री०) अत्र उपविशथः । ................................ ।

(13) यूयं (पुं०) कृषिकार्यं कुरुथ । ................................ ।

(14) यूयं (स्त्री०) गीतं गायथ । ................................ ।

(15) यूयं (स्त्री०) प्रातः उत्तिष्ठथ । ................................ ।

www.thearyasamaj.org

# 7. सप्तमः पाठः

## प्रश्नोत्तराणि

प्रश्नवाचकाः



शीला – लते ! त्वं किं करोषि ?

लता – अहं पाठं पठामि । त्वम् ........ ?

शीला – अहम् अन्यत्र गच्छामि ।

लता – कुत्र गच्छसि ?

शीला – विपणिं गच्छामि ।

लता – कदा ?

शीला – इदानीम् एव ।

लता – किमर्थम् ?

शीला – वस्तूनि आवश्यकानि । अतः गच्छामि ।

लता – वस्तूनि कुतः आनयसि ?

शीला – विपणिमध्ये केशवलाल–आपणतः आनयामि ।

लता – मम अपि वस्तूनि आवश्यकानि । अहमपि आपणम् आगच्छामि ।
कञ्चित् कालम् अत्र उपविशतु । पश्चात् गच्छावः ।

शीला – तथैव भवतु ।

## अभ्यासः – 7

I. **प्रश्नवाक्यानि लिखन्तु–**

प्र0– 1. त्वं ................................ ? उ0– 1. अहम् अन्यत्र गच्छामि ।

2. त्वं ................................ ? 2. अहम् इदानीम् एव गच्छामि ।

3. त्वं ................................ ? 3. वस्तूनि आवश्यकानि । अतः गच्छामि ।

4. त्वं ................................ ? 4. अहम् आपणतः वस्तूनि आनयामि ।

www.thearyasamaj.org



II. 'अत्र, तत्र, सर्वत्र' एतैः शब्दैः उत्तराणि लिखन्तु–

1. लेखनी कुत्र अस्ति ? .................. .................. अस्ति।
2. बालकः कुत्र अस्ति ? बालकः .................. ..................।
3. देवः कुत्र अस्ति ? .................. .................. ..................।
4. वायुः कुत्र अस्ति ? .................. .................. ..................।
5. पुस्तकं कुत्र अस्ति ? .................. .................. ..................।

III. ध्यानेन पठन्तु–

| | | | | | |
|---|---|---|---|---|---|
| प्रातः | – | उत्थानम् | परश्वः | – | उत्सवः |
| सायं | – | क्रीडा | अद्य | – | स्पर्धा |
| मध्याह्ने | – | भोजनम् | परह्यः | – | नाटकम् |
| शोककाले | – | न पठनम् | प्रपरह्यः | – | विवाहः |
| श्वः | – | गमनम् | प्रपरश्वः | – | परीक्षा |

✍ मञ्जूषायाः आधारेण उत्तराणि लिखन्तु–

उदा० – 1. त्वं कदा भोजनं करोषि ? अहं मध्याह्ने भोजनं करोमि।
2. सः कदा उत्तिष्ठति ? .................. .................. ..................।
3. बालकः कदा क्रीडति ? .................. .................. ..................।
4. त्वं कदा न पठसि ? .................. .................. ..................।
5. त्वं कदा नगरं गमिष्यसि ? .................. .................. ..................।
6. उत्सवः कदा भविष्यति ? .................. .................. ..................।
7. स्पर्धा कदा भविष्यति ? .................. .................. ..................।
8. नाटकं कदा आसीत् ? .................. .................. ..................।
9. मित्रस्य विवाहः कदा आसीत् ? .................. .................. ..................।
10. परीक्षा कदा भविष्यति ? .................. .................. ..................।

www.thearyasamaj.org



IV. ध्यानेन पठन्तु–

| | एक० | बहु० |
|---|---|---|
| पुंलिङ्गे– | आवश्यकः | आवश्यकाः |
| स्त्रीलिङ्गे– | आवश्यकी | आवश्यक्यः |
| नपुंसके– | आवश्यकम् | आवश्यकानि |

✍ उदाहरणानुसारम् उचितेन शब्देन रिक्तस्थानं पूरयन्तु–

उदा० – लेखनी आवश्यकी ।

1. पुस्तकम् .................. । 2. अङ्कनी .................. ।
3. धनम् .................. । 4. निद्रा .................. ।
5. उत्साहः .................. । 6. धैर्यम् .................. ।
7. लेखन्यः .................. । 8. पेटिका .................. ।
9. फलानि .................. । 10. स्यूताः .................. ।

V. उदाहरणानुगुणम् उत्तरवाक्यानि लिखन्तु–

1. फलानि – विपणिः
प्र०– त्वं किमर्थं विपणिं गच्छसि ?
उ०– **फलानि आवश्यकानि अतः अहं विपणिं गच्छामि ।**

2. पुस्तकम् – ग्रन्थालयः
प्र०– सः किमर्थं ग्रन्थालयं गच्छति ?
उ०– .................. । .................. ।

3. स्यूतः – आपणः
प्र०– सा किमर्थम् आपणं गच्छति ?
उ०– .................. । .................. ।

4. भोजनम् – गृहम्
प्र०– यूयं किमर्थं गृहं गच्छथ ?
उ०– .................. । .................. ।

5. लेखनी – प्रकोष्ठः
प्र०– भवती किमर्थं प्रकोष्ठं गच्छति ?
उ०– .................. । .................. ।

# 8. अष्टमः पाठः

**मम दिनचर्या**

**समयः – घटिकायन्त्रेण**



मम नाम दिनेशः। अहं प्रातः काले **पञ्चवादने** उत्तिष्ठामि। अनन्तरं दन्तधावनं करोमि। मुखप्रक्षालनं करोमि। प्रातःस्मरणं करोमि। **षड्वादने** सूर्यनमस्कारं करोमि। **सप्तवादने** स्नानं करोमि। अनन्तरं पाठं पठामि। गृहकार्यं करोमि। **अष्टवादने** अल्पाहारं स्वीकरोमि। **नववादने** विद्यालयं गच्छामि। तत्र पाठान् पठामि।

मध्याह्ने **सार्धद्वादशवादने** भोजनं करोमि। सायङ्काले **सार्धचतुर्वादने** क्रीडांगणे क्रीडामि। सपादषड्वादने आगच्छामि। रात्रौ **सपादसप्तवादने** भोजनं करोमि। अनन्तरं **पादोनदश-वादनपर्यन्तं** पाठान् पठामि। **दशवादने** शयनं करोमि।

रमेश ! त्वं कदा उत्तिष्ठसि ? अहं **सार्धपञ्चवादने** उत्तिष्ठामि। शारदा कदा अल्पाहारं स्वीकरोति ? शारदा **पादोन–अष्टवादने** अल्पाहारं स्वीकरोति। बालाः कदा विद्यालयं गच्छन्ति ? बालाः **सपादनववादने** विद्यालयं गच्छन्ति। सायङ्काले **सपादचतुर्वादने** विद्यालयस्य घण्टा नदति। वयं **पादोनषड्वादने** गृहं गच्छामः।

www.thearyasamaj.org



## अभ्यासः – 8

1. **समयम् अक्षरैः लिखन्तु–**

* 12.30 – ........................................ ।

* 04.30 – ........................................ ।


* 06.15 – ........................................ ।

* 07.15 – ........................................ ।

* 09.45 – ........................................ ।

* 07.45 – ........................................ ।

2. **समयम् अक्षरैः लिखन्तु–**



(अ) 5.00 – ....................



(आ) 12.30 – ....................



(इ) 6.15 – ....................



(ई) 10.45 – ....................

3. **चित्राणाम् आधारेण शब्दान् लिखन्तु–**



1. ....................



2. ....................



3. ....................



4. ....................

www.thearyasamaj.org


IV. रामस्य दिनवर्यां यथोचितं यथाक्रमं लिखन्तु–

| | | | | |
|---|---|---|---|---|
| 1. | प्रातः | – | 5.00 | अल्पाहारं स्वीकरोति। |
| 2. | प्रातः | – | 8.00 | भोजनं करोति। |
| 3. | मध्याह्ने | – | 12.30 | उत्तिष्ठति। |
| 4. | सायं | – | 5.45 | गृहं प्रत्यागच्छति। |
| 5. | रात्रौ | – | 10.00 | शयनं करोति। |

1. रामः प्रातः पञ्चवादने उत्तिष्ठति ।
2. ........................................................ ।
3. ........................................................ ।
4. ........................................................ ।
5. ........................................................ ।

V. दिनेशस्य दिनचर्यां लिखन्तु–

1. दिनेशः ........................ सूर्यनमस्कारं करोति।
2. दिनेशः ........................ स्नानं करोति।
3. दिनेशः ........................ अल्पाहारं स्वीकरोति।
4. दिनेशः ........................ भोजनं करोति।
5. दिनेशः ........................ क्रीडति।
6. दिनेशः ........................ शयनं करोति।

www.thearyasamaj.org

# नवमः पाठः – 9

## विवेकयुक्तः मीनः

अस्–धातुः, वर्त्तमानकालः

एकः जलाशयः **अस्ति**। अत्र त्रयः मीनाः **सन्ति**। ते सुखेन जीवन्ति। एकदा धीवराः तत्र आगच्छन्ति। ते वदन्ति– "अत्र अनेके मीनाः **सन्ति**। वयं श्वः आगत्य तान् नेष्यामः।" अनन्तरं ततः गच्छन्ति।

एकः मीनः वदति– "अहं भीतः **अस्मि**। युवां कथं भीतौ न **स्थः** ?" अन्यौ वदतः– "आवां धीरौ **स्वः**। अतः नास्ति चिन्ता।"

**प्रथमः** वदति– "वयम् अन्यत्र गच्छाम।"

**द्वितीयः** वदति–"त्वं वृथा भीतः **असि**। वयं बहुकालतः अत्र सुखेन **स्मः**। **किमर्थम्** अन्यत्र गच्छाम ?" इति।

**प्रथमः वदति**– "अहं भीतः **अस्मि**। अहम् अन्यत्र गच्छामि" इति।

**तृतीयः वदति**– "त्वम् एकः गच्छ। आवाम् अत्र एव **स्वः**।"

प्रथमः मीनः अन्यं जलाशयम् अगच्छत्। अनन्तरदिने धीवराः तत्र आगच्छन्ति। जलाशयं पश्यन्ति। तत्र मीनौ स्तः। धीवराः तौ गृहीत्वा नयन्ति।

---

## अभ्यासः– 9

I. ध्यानेन पठन्तु–

अस्–धातुः वर्त्तमानकाले

| | | |
|---|---|---|
| अस्ति | स्तः | सन्ति |
| असि | स्थः | स्थ |
| अस्मि | स्वः | स्मः |

अस्-धातुः भूतकाले

| | | |
|---|---|---|
| आसीत् | आस्ताम् | आसन् |
| आसीः | आस्तम् | आस्त |
| आसम् | आस्व | आस्म |

2 एतेषां वाक्यानां कालपरिवर्तनं कुर्वन्तु–

यथा– 1. एकः जलाशयः अस्ति। .................. .................. ..................।

2. त्रयः मीनाः सन्ति। .................. .................. ..................।

3. धीवराः तत्र सन्ति। .................. .................. ..................।

www.thearyasamaj.org



4. अहं बालः अस्मि। ........ ........ ........ ।
5. वयं छात्राः स्मः। ........ ........ ........ ।
6. त्वं शिशुः असि। ........ ........ ........ ।
7. यूयं प्रयागे स्थ। ........ ........ ........ ।
8. आवां रुग्णौ स्वः। ........ ........ ........ ।
9. भारतीयाः धन्याः सन्ति। ........ ........ ........ ।

II. एतेषां वाक्यानां उत्तमपुरुषे परिवर्तनं कुर्वन्तु–

यथा– 1. त्वं पण्डितः असि। अहं पण्डितः अस्मि ।
2. युवां दुःखितौ स्थः। ........ ........ ........ ।
3. यूयं श्रान्ताः स्थ। ........ ........ ........ ।
4. त्वं खिन्नः असि। ........ ........ ........ ।
5. युवां सन्तुष्टौ स्थः। ........ ........ ........ ।
6. यूयं निर्भीताः स्थ। ........ ........ ........ ।

III. एतेषां प्रश्नानाम् उत्तरं लिखन्तु–

यथा– 1. त्वं कः असि ? अहं युवकः अस्मि ।
2. युवां कौ स्थः ? ........ स्नेहितौ ........ ।
3. यूयं के स्थ ? ........ नागरिकाः ........ ।
4. भवान् कुत्र अस्ति ? ........ दिल्लीनगरे ........ ।
5. भवन्तौ कस्य भक्तौ स्तः ? ........ देशस्य भक्तौ ........ ।
6. भवन्तः के सन्ति ? ........ वैज्ञानिकाः ........ ।
7. भवती का अस्ति ? ........ बालिका ........ ।
8. भवत्यः काः सन्ति ? ........ युवत्यः ........ ।

IV. अस्–धातोः वर्त्तमानकालिकक्रियापदैः रिक्तस्थानानि पूरयन्तु–

यथा– 1. मम विद्यालये प्रधानाचार्यः अस्ति।
2. मम विद्यालये आचार्याः ........ ।
3. मम विद्यालयस्य पुस्तकालये पुस्तकानि ........ ।
4. अद्य मम विद्यालये स्पर्धा ........ ।
5. मम विद्यालये क्रीडाङ्गणम् ........ ।
6. मम विद्यालये रक्षकौ ........ ।
7. अस्मिन् मासे मम विद्यालये परीक्षाः ........ ।
8. अस्मिन् सप्ताहे मम विद्यालये क्रीडायाः आयोजनम् ........ ।
9. अद्य मम विद्यालये वार्षिकोत्सवः ........ ।

www.thearyasamaj.org

# 10. दशमः पाठः

## वयं भारतीयाः

### अस् – धातुः, वर्त्तमानकाले त्रिषु पुरुषेषु



एषः भारतदेशः **अस्ति**। एषः प्राचीनः ऐतिहासिकः सांस्कृतिकदेशः **अस्ति**। अत्र अनेकाः भाषाः, विविधानि मतानि च **सन्ति**। बहुविधाः आचाराः विचाराः च **सन्ति**। तथापि वयं भारतीयाः संस्कृतसूत्रबद्धाः **स्मः**। 'वयं भारतीयाः' इति भावना अत्र सुदृढा **अस्ति**। भवान् हिन्दुः **अस्ति**। सः मुस्लिमः **अस्ति**, त्वं क्रैस्तः **असि**, अहं सिक्खः **अस्मि** इति एषा भावना अत्र भेदिका न **अस्ति**। वयं सर्वे भारतीयाः **स्मः**। भारतीयाः वयं धन्याः।

## अभ्यासः – 10

1. **ध्यानेन पठन्तु–**

| | एक0 | द्वि0 | बहु0 |
|---|---|---|---|
| प्र0 पु0 | अस्ति | स्तः | सन्ति |
| म0 पु0 | असि | स्थः | स्थ |
| उ0 पु0 | अस्मि | स्वः | स्मः |

✍ **उदाहरणानुगुणं प्रथममध्यमोत्तमपुरुषरूपाणि लिखन्तु–**

**प्रथमपुरुषः**

उदा0 – 1. सः धीरः अस्ति।

2. तौ ............ ............।

3. ............ धीराः ............।

www.thearyasamaj.org


| | |
|---|---|
| मध्यमपुरुषाः | 4. त्वं ............ ............ ............ ।<br>5. ............ धीरौ ............ ।<br>6. यूयं ............ ............ । |
| उत्तमपुरुषाः | 7. अहं ............ ............ ।<br>8. आवां ............ ............ ।<br>9. वयं ............ ............ । |

II पाठानुसारं रिक्तस्थानानि पूरयन्तु–

1. भारतदेशः प्राचीनः ............ ............ ............ अस्ति।
2. अत्र ............ ............ विविधानि मतानि ............ ............ ।
3. वयं ............ संस्कृतसूत्रसम्बद्धाः स्मः।
4. भारतीयाः ............ धन्याः।

III. योग्येन क्रियापदरूपेण रिक्तस्थानं पूरयन्तु–

1. त्वं बालकः ............ ।
2. अहं तरुणः ............ ।
3. वयं भारतीयाः ............ ।
4. यूयं देशभक्ताः ............ ।
5. आवां धीरौ ............ ।
6. युवां शूरौ ............ ।
7. ते चतुराः ............ ।
8. तौ समर्थौ ............ ।

IV. गणे विजातीयं पदं रेखाङ्कितं कुर्वन्तु–

यथा– 1. हिन्दुः, मुस्लिमः, क्रैस्तः, मनुष्यः।


2. गङ्गा, यमुना, द्रौपदी, कावेरी।
3. संस्कृतम्, देवनागरी, हिन्दी, मराठी।
4. आनन्दः, हिमालयः, सह्यः, विन्ध्यः।
5. शैवः, वैष्णवः, पाशुपतः, ब्राह्मणः।
6. द्वैतम्, अद्वैतम्, द्वयम्, विशिष्टाद्वैतम्।

www.thearyasamaj.org

# 11. एकादशः पाठः

द्वितीया

## विद्यालयः




एषः अस्माकं विद्यालयः। अस्माकं विद्यालयः विशालः अस्ति। अत्र पञ्चशतं छात्राः पठन्ति। विद्यालयस्य भवनं सुन्दरम्। विद्यालयः पर्वतस्य उपरि अस्ति। विद्यालयस्य वामतः उद्यानम् अस्ति। दक्षिणतः अपि उद्यानम् अस्ति। विद्यालयस्य पुरतः ध्वजस्तम्भः अस्ति। विद्यालयस्य पृष्ठतः वृक्षाः सन्ति।

एषा अस्माकम् अध्यापिका रमा। एषा **अस्मान् संस्कृतं** पाठयति। सा **कथां** श्रावयति। **पाठ्योपकरणानि** दर्शयति। **सुभाषितानि** वाचयति। **गीतानि** अपि गायति। **सम्भाषणम्** अपि बोधयति। अस्माकं गणिताध्यापकः उत्तमतया **गणितं** बोधयति। सः उत्तरकथनार्थम् **अस्मान्** प्रेरयति। **विनोदकणिकाः** उक्त्वा सर्वान् हासयति।

वयं विद्यालयारम्भसमये **प्रार्थनाश्लोकान्** वदामः। ततः **प्रमुखवार्ताः** शृणुमः। अनन्तरं स्वकक्षां गच्छामः। सायं पञ्चवादनपर्यन्तं वयं पाठान् **पठामः**। मध्याह्ने भोजनविरामसमये **पाथेयं** स्वीकुर्मः। सायं वयं क्रीडामः। क्रीडा **आनन्दं** ददाति। **शक्तिम्** अपि ददाति। **अनुशासनं** बोधयति। **परस्परमैत्रीं** वर्धयति।गृहे वयं **पाठान्** पठामः। प्रश्नानाम् **उत्तराणि** लिखामः। **श्लोकान्** कण्ठस्थीकुर्मः। ततः **स्वज्ञानं** वर्धयामः। वयम् उत्तमाः छात्राः भविष्यामः।

www.thearyasamaj.org



ध्यानेन पठन्तु–

## द्वितीयाविभक्तिरूपाणि

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| पुं० | – | पाठम् | पाठौ | पाठान् |
| स्त्री०–आ० | – | कथाम् | कथे | कथाः |
| स्त्री०–ई० | – | लेखनीम् | लेखन्यौ | लेखनीः |
| नपुं० | – | गीतम् | गीते | गीतानि |

### अभ्यासः– 11

I. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

उदा० –

1. अकारान्तः | पुंलिङ्गः | द्वितीया विभक्तिः | **पाठम्** | एकवचनम्

2. ............ **पाठौ** ............

3. ............ **पाठान्** ............

4. ............ **कथे** ............

5. ............ **गीतानि** ............

6. ............ **लेखन्यः** ............

7. ............ **अस्मान्** ............

8. ............ **वयम्** ............

9. ............ **सर्वान्** ............

10. ............ **सा** ............

www.thearyasamaj.org



## II. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

| | | | एक० | द्वि० | बहु० |
|---|---|---|---|---|---|
| (क) | काकः | – | काकम् | काकौ | काकान् |
| | खगः | – | .................... | .................... | .................... |
| | नगः | – | .................... | .................... | .................... |
| | पर्वतः | – | .................... | .................... | .................... |
| | स्वरः | – | .................... | .................... | .................... |
| (ख) | कन्या | – | कन्याम् | कन्ये | कन्याः |
| | सुधा | – | .................... | .................... | .................... |
| | सुबोधा | – | .................... | .................... | .................... |
| | ममता | – | .................... | .................... | .................... |
| | ललिता | – | .................... | .................... | .................... |
| (ग) | बोधिनी | – | बोधिनीम् | बोधिन्यौ | बोधिनीः |
| | दर्शिनी | – | .................... | .................... | .................... |
| | सम्भाषिणी | – | .................... | .................... | .................... |
| | विद्योतिनी | – | .................... | .................... | .................... |
| | अभ्यासिनी | – | .................... | .................... | .................... |
| (घ) | पुष्पम् | – | पुष्पम् | पुष्पे | पुष्पाणि |
| | पत्रम् | – | .................... | .................... | .................... |
| | फलम् | – | .................... | .................... | .................... |
| | जलम् | – | .................... | .................... | .................... |
| | द्वारम् | – | .................... | .................... | .................... |
| (ङ) | सः | – | तम् | तौ | तान् |
| | सा | – | .................... | .................... | .................... |
| | तत् | – | .................... | .................... | .................... |

www.thearyasamaj.org



III. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु-

| | | | |
|---|---|---|---|
| उदा०- 1. | पत्रम् | पत्रे | पत्राणि |
| 2. | तृणम् | ................ | तृणानि |
| 3. | ................ | रसौ | रसान् |
| 4. | जलम् | जले | ................ |
| 5. | ................ | बालकौ | बालकान् |
| 6. | अश्वम् | ................ | अश्वान् |
| 7. | कन्याम् | कन्ये | ................ |
| 8. | ................ | बालिके | बालिकाः |
| 9. | मक्षिकाम् | ................ | मक्षिकाः |
| 10. | लेखनीम् | ................ | लेखनीः |
| 11. | ................ | गृहिण्यौ | गृहिणीः |
| 12. | अङ्कनीम् | अङ्कन्यौ | ................ |
| 13. | एताम् | ................ | एताः |
| 14. | ताम् | ते | ................ |
| 15. | ................ | के | काः |
| 16. | सर्वम् | सर्वे | ................ |
| 17. | ................ | सर्वौ | सर्वान् |
| 18. | सर्वाम् | सर्वे | ................ |
| 19. | भवन्तम् | ................ | भवतः |
| 20. | भवतीम् | ................ | भवतीः |
| 21. | एतम् | ................ | एतान् |
| 22. | ................ | तौ | तान् |
| 23. | किम् | के | ................ |
| 24. | ................ | कौ | कान् |
| 25. | काम् | के | ................ |

www.thearyasamaj.org



IV. उचितपदेन रिक्तस्थानं पूरयन्तु–

चित्रम्, पुस्तकानि, तृणम्, रसम्, फले, अङ्कन्यौ, जननीम्, जलम्, दुग्धम्, पत्रे

उदा०–1. बालकः ......दुग्धं...... पिबति। 6. बालिका ............ पिबति।
2. अश्वः ............ खादति। 7. वानरौ ............ खादतः।
3. छात्रे ............ आनयतः। 8. अजा ............ पिबति।
4. अध्यापकः ............ दर्शयति। 9. शिक्षकौ ............ लिखतः।
5. छात्राः ............ पठन्ति। 10. पुत्री ............ आह्वयति।

V. रिक्तस्थानं पूरयन्तु–

1. अध्यापिका ......संस्कृतं...... पाठयति। (संस्कृत)
2. गणिताध्यापकः ............ वदति। (विनोदकणिका)
3. अध्यापकाः ............ लिखन्ति। (लेख)
4. प्रार्थनानन्तरं वयं ............ शृणुमः। (प्रमुखवार्ता)
5. क्रीडा ............ वर्धयति। (परस्परमैत्री)
6. गृहे वयं ............ पठामः। (पाठ)

VI. इतराणि रूपाणि लिखन्तु–

(अ)

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| उदा०–1. एतत् पुं० प्रथमा | – | एषः | एतौ | एते |
| 2. किम् पुं० द्वितीया | – | ............ | ............ | ............ |
| 3. तत् स्त्री० द्वितीया | – | ............ | ............ | ............ |
| 4. सर्व पुं० प्रथमा | – | ............ | ............ | ............ |
| 5. भवत् नपुं० द्वितीया | – | ............ | ............ | ............ |
| 6. फल नपुं० प्रथमा | – | ............ | ............ | ............ |

www.thearyasamaj.org



(आ)

| एकवचनरूपाणि लिखन्तु– | | | बहुवचनरूपाणि लिखन्तु– | | |
|---|---|---|---|---|---|
| उदा० – तानि | – | तत् | कौ | – | कान् |
| बालिकाः | – | ........................ | पुष्पे | – | ........................ |
| सर्वाणि | – | ........................ | भवत्यौ | – | ........................ |
| तान् | – | ........................ | सर्वे | – | ........................ |
| एतानि | – | ........................ | एतौ | – | ........................ |
| कन्याः | – | ........................ | सुभाषिते | – | ........................ |
| मक्षिकाः | – | ........................ | गीते | – | ........................ |
| भवनानि | – | ........................ | सम्भाषणे | – | ........................ |
| लेखन्यः | – | ........................ | कथे | – | ........................ |
| विद्यालयः | – | ........................ | विनोदकणिके | – | ........................ |
| उत्तराणि | – | ........................ | श्लोकौ | – | ........................ |

(इ)

रिक्तस्थाने शुद्धरूपं लिखन्तु–

1. वयं – ........................ पठामः। (पाठाः / पाठान्)
2. वयं – ........................ शृणुमः। (विशेषवार्ताः / विशेषवार्ता)
3. वयं – ........................ कण्ठस्थीकुर्मः। (श्लोकान् / श्लोकाः)
4. वयं – ........................ गच्छामः। (कक्ष्याम् / कक्ष्या)
5. अध्यापिका – ........................ दर्शयति। (पाठ्योपकरणानि / पाठ्योपकरणम्)
6. ताः – ........................ क्रीणन्ति। (शाटिका / शाटिकां)
7. एतौ – ........................ आनयतः। (चषकाः / चषकान्)

www.thearyasamaj.org

# 12. द्वादशः पाठः

**शृणोति / ददाति / करोति**

## गीतानि शृणोमि



माता – वत्स ! किं करोषि ?

पुत्रः – अम्ब ! गीतानि **शृणोमि** ।

माता – प्रातःकालतः गीतानि एव **शृणोषि** ?तदपि सर्वाणि कार्याणि विहाय ..............................

पुत्रः – किं भवत्यः न **शृण्वन्ति** ?

माता – वयम् अपि **शृणुमः** । किन्तु कदाचित् एव । न तु आदिनम् ।

पुत्रः – एतत् श्रवणयन्त्रं मित्रस्य । 'सायं **प्रतिददातु**' इति उक्त्वा दत्तवान् अस्ति सः । उक्ते समये न **प्रतिददामि** चेत् अग्रे न दास्यति । यतः सः प्रतिदिनं वार्त्तां **शृणोति** ।

माता – आम्, सर्वे स्वयन्त्रम् अन्यस्मै न **ददति** । 'न **दद्मः**' इति वदन्ति ते ।

पुत्रः – एषः न तादृशः । "एतानि गीतानि उत्तमानि सन्ति । शृणोतु । स्वकीयं यन्त्रं **ददामि**, नयतु" इति पुनः पुनः वदति । सन्तोषेण यन्त्रं **ददाति** अपि । अम्ब ! .............................. अम्ब ! मह्यम् अपि श्रवणयन्त्रं दापयतु कृपया .............................. ।

माता – किं करवाम वत्स ! अस्माकं गृहस्य आर्थिकस्थितिः सर्वदा सामान्या एव । भवतः जनकः यावत् धनसम्पादनं **करोति** तावत् अपर्याप्तं भवति । असहायः सः किं वा करोतु ?

पुत्रः – अम्ब ! अद्यत्वे बहवः बालाः अपि उद्योगं **कुर्वन्ति** किल ! अहम् अपि कमपि उद्योगं **करोमि** ।

माता – मास्तु वत्स ! भवान् धनसम्पादनचिन्तां मा करोतु । तत् वयं **कुर्मः** । भवान् पठने मतिं करोतु । अलं वार्तालापेन । शीघ्रं गीतानि शृणोतु । अनन्तरं श्रवणयन्त्रं मित्राय प्रतिददातु ।

www.thearyasamaj.org



📖 ध्यानेन पठन्तु–

| | | |
|---|---|---|
| शृणोति | शृणुतः | शृण्वन्ति |
| शृणोषि | शृणुथः | शृणुथ |
| शृणोमि | शृण्वः / शृणुवः | शृण्मः / शृणुमः |

| | | |
|---|---|---|
| करोति | कुरुतः | कुर्वन्ति |
| करोषि | कुरुथः | कुरुथ |
| करोमि | कुर्वः | कुर्मः |

| | | |
|---|---|---|
| ददाति | दत्तः | ददति |
| ददासि | दत्थः | दत्थ |
| ददामि | दद्वः | दद्मः |

---

## अभ्यासः– 12

I. इतराणि रूपाणि लिखन्तु–

| | | | |
|---|---|---|---|
| उदा०– 1. | शृणोति | शृणुतः | शृण्वन्ति |
| 2. | .................... | कुरुतः | .................... |
| 3. | ददामि | .................... | .................... |
| 4. | .................... | .................... | शृणुथ |
| 5. | ददासि | .................... | .................... |
| 6. | .................... | कुर्वः | .................... |
| 7. | करोषि | .................... | .................... |
| 8. | .................... | .................... | ददति |
| 9. | .................... | शृण्वः | .................... |

www.thearyasamaj.org



## II. पुरुषक्रमेण रूपाणि चित्वा लिखन्तु–

करोमि, शृणोति, दद्वः, दत्थ, करोषि, ददति, ददासि, कुर्वः, शृणुतः,
कुरुतः, ददामि, कुरुथ, शृणुथः, दत्तः, शृण्मः,

| प्र० पु० | म० पु० | उ० पु० |
|---|---|---|
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |

## III. 'श्रु' धातोः उचितेन रूपेण रिक्तस्थानं पूरयन्तु–

1. वयं गीतानि ............ ।
2. ते सङ्गीतं ............ ।
3. तौ कथां ............ ।
4. आवां वार्तां ............ ।
5. किं त्वं सम्भाषणं न ............ ?
6. अहं संस्कृतवार्तां प्रतिदिनं ............ ।
7. यूयं पाठं ............ ।

## IV. 'कृ' धातुरूपैः रिक्तस्थानानि पूरयन्तु–

1. बालकाः कार्यं ............ ।
2. यूयं किं ............ ?
3. वयं सम्भाषणं ............ ।
4. ते अध्ययनं ............ ।
5. तौ निद्रां ............ ।
6. आवां स्नानं ............ ।
7. गृहिण्यौ पाकं ............ ।

www.thearyasamaj.org



V. एतेषां शब्दानां साहाय्येन अग्रे वाक्यानि पूरयन्तु–

| | | |
|---|---|---|
| सा | ते | ताः |
| त्वम् | युवाम् | यूयम् |
| अहम् | आवाम् | वयम् |

| | | |
|---|---|---|
| ददाति | दत्तः | ददति |
| ददासि | दत्थः | दत्थ |
| ददामि | दद्वः | दद्मः |

यथा– 1. सा पुस्तकं ददाति।

2. त्वं ........ फलं ........................ ।

3. .................. नाणकं ........................ ।

4. .................. वेतनं ........................ ।

5. .................. आम्रं ........................ ।

6. .................. करवस्त्रं ........................ ।

7. .................. उपनेत्रं ........................ ।

8. .................. पात्रं ........................ ।

9. .................. छत्रं ........................ ।

10. .................. भोजनं ........................ ।

VI. पुरुषं वचनं च निर्दिशन्तु–

| | | | |
|---|---|---|---|
| उदा०– 1. | कुरुतः | प्रथमपुरुषः | द्विवचनम् |
| 2. | कुर्वन्ति | .................. | .................. |
| 3. | ददाति | .................. | .................. |
| 4. | ददति | .................. | .................. |
| 5. | कुर्वः | .................. | .................. |
| 6. | दत्थ | .................. | .................. |
| 7. | शृणुथः | .................. | .................. |

www.thearyasamaj.org

# 13. त्रयोदशः पाठः

## वस्त्राणि क्रीणामि

**क्रीणाति / जानाति**

रमेशः – नलिनि भगिनि ! अत्र समीपे आपणाः कुत्र सन्ति ?

नलिनी – किं क्रेतुम् इच्छति भवान् ? वस्त्राणि, प्रसाधनसामग्रीः उत अन्यत् किमपि ?

रमेशः – अहं वस्त्राणि **क्रीणामि**। अन्यवस्तूनि पश्यामि। मूल्यं दृष्ट्वा **क्रीणामि**।

नलिनी – तर्हि भवान् करोलबाग–आपणं गच्छतु। तत्र वस्त्रापणाः बहवः। तत्र वस्त्राणि क्रीणातु। वयम् अपि तत्रैव वस्त्राणि **क्रीणीमः**।

रमेशः – अहम् अस्य आपणस्य विषये अधिकं न **जानामि**।

नलिनी – अहं बोधयामि। भवान् वस्त्राणि मार्गपार्श्वे मा क्रीणातु। ते वञ्चयन्ति। आपणे एव क्रीणातु।

रमेशः – बहवः मार्गपार्श्वे **क्रीणन्ति** किल ?

नलिनी – तथापि भवान् तत्र मा गच्छतु।

रमेशः – अस्तु। अत्र सङ्गणकीयवस्तूनाम् आपणः कुत्र अस्ति इति किं भवती **जानाति** ?

नलिनी – न स्मरामि। मम अग्रजः **जानाति**। अनुजादयः अपि **जानन्ति**। अहं कञ्चित् पृष्ट्वा वदिष्यामि। स्यात् नेहरुप्लेस इति स्थाने।

www.thearyasamaj.org



ध्यानेन पठन्तु–

| | | |
|---|---|---|
| जानाति | जानीतः | जानन्ति |
| जानासि | जानीथः | जानीथ |
| जानामि | जानीवः | जानीमः |

| | | |
|---|---|---|
| क्रीणाति | क्रीणीतः | क्रीणन्ति |
| क्रीणासि | क्रीणीथः | क्रीणीथ |
| क्रीणामि | क्रीणीवः | क्रीणीमः |

| | | |
|---|---|---|
| गृह्णाति | गृह्णीतः | गृह्णन्ति |
| गृह्णासि | गृह्णीथः | गृह्णीथ |
| गृह्णामि | गृह्णीवः | गृह्णीमः |

## अभ्यासः– 13

I. उत्तराणि लिखन्तु–

1. रमेशः किं क्रीणाति ? ........................................ ।
2. नलिनीगृहजनाः किं क्रीणन्ति ? ........................................ ।
3. नलिनी कं न जानाति ? ........................................ ।
4. नलिन्याः अनुजाः किं जानन्ति ? ........................................ ।

II. वचनानुगुणं रूपाणि विभजन्तु–

क्रीणाति, जानीमः, गृह्णीथः, गृह्णासि, क्रीणीथः, जानीवः, जानामि, क्रीणीमः, गृह्णीतः, क्रीणामि, क्रीणन्ति, जानीथ, गृह्णामि, गृह्णीथ, क्रीणीवः

| एक० | द्वि० | बहु० |
|---|---|---|
| ........ | ........ | ........ |
| ........ | ........ | ........ |
| ........ | ........ | ........ |
| ........ | ........ | ........ |
| ........ | ........ | ........ |

www.thearyasamaj.org



III. एतेषां बहुवचने परिवर्तनं कुर्वन्तु–

| | | |
|---|---|---|
| यथा– 1. | छात्रः संस्कृतं जानाति। | छात्राः संस्कृतं जानन्ति । |
| 2. | शिक्षकः सुधाखण्डं गृह्णाति। | ........ ........ ........ । |
| 3. | त्वं किं जानासि ? | ........ ........ ........ ? |
| 4. | अहं तरणं जानामि। | ........ ........ ........ । |
| 5. | ग्राहकः वस्तूनि क्रीणाति। | ........ ........ ........ । |
| 6. | भगिनी हारान् क्रीणाति। | ........ ........ ........ । |
| 7. | त्वं फलकं गृह्णासि। | ........ ........ ........ । |

IV. एतेषां प्रश्नानाम् उत्तरं लिखन्तु–


| | | |
|---|---|---|
| यथा– 1. | त्वं किं जानासि ? | अहं हिन्दीभाषां जानामि। |
| 2. | त्वं किं क्रीणासि ? | ........ वस्त्रं ........ । |
| 3. | त्वं किं गृह्णासि ? | ........ कन्दुकं ........ । |
| 4. | युवां किं जानीथः ? | ........ सङ्गीतं ........ । |
| 5. | युवां किं क्रीणीथः ? | ........ युतकं ........ । |
| 6. | यूयं किं क्रीणीथ ? | ........ शाकान् ........ । |
| 7. | यूयं किं जानीथ ? | ........ संस्कृतं ........ । |

www.thearyasamaj.org

# 14. चतुर्दशः पाठः

**लोट् – मध्यम–पुरुषे**

## उपदेशः



सिंहासनम् आरोढुं सन्नद्धं राजकुमारं वृद्धमन्त्री उपदिष्टवान्। वत्स ! राजकुमार ! गुरुकुले त्वम् आचार्यमुखात् सर्वं श्रुतवान् असि। तथापि कर्त्तव्यबुद्ध्या किञ्चित् उपदिशामि। **शृणु**। अधिकारमदः धनमदः च नृपं मार्गभ्रष्टं करोति। अतः त्वं जागरूको **भव**। स्वार्थसम्पादकाः त्वां परितः भविष्यन्ति। तान् उपायेन **निवारय**। सज्जनाः अर्हाः च पर्णान्तरितफलानि इव दूरे तिष्ठन्ति। तान् अन्विष्य **पोषय**। अर्हान् **पुरस्कुरु**। दण्ड्यान् दण्डय। अधीनेषु नियमपालनविषये कठोरो **भव**। साहाय्यकरणे मृदुताम् **आचर**। गुरुजनान् आदरेण **पश्य**। मुनिजनान् भक्त्या **नमस्कुरु**। ज्ञानवृद्धान् विनयेन **प्रणम**। बान्धवान् अनुचिते स्थाने मा **प्रतिष्ठापय**। अर्हजनान् उच्चस्थाने **नियोजय**। पक्षपातं कदापि मा **कुरु**। उपनिषदः उपदेशान् **स्मर**। "सत्यं **वद**। धर्मं **चर**। स्वाध्यायं मा **परित्यज**। मातृदेवो **भव**। पितृदेवो **भव**। आचार्य देवो **भव**। अतिथिदेवो **भव**।" इति खलु वदन्ति उपनिषदः ?अन्यदपि अहं वदामि "राष्ट्रदेवो **भव**। समाजसेवको **भव**। लोकपूजको **भव**। दीनोद्धारको **भव**" इति।

सर्वं ज्ञातवन्तं भवन्तम् इतः अपि अधिकं किम् उपदिशानि ? सर्वदा कर्तव्यं **स्मर**। प्रजाः पुत्रवत् **पालय**। विजयी **भव**। दिग्विजयी **भव**।

www.thearyasamaj.org



ध्यानेन पठन्तु–

1. अध्यापकः छात्रम् उपदिशति। यूयं सम्यक् **पठत**।
2. जननी पुत्रम् आह्वयति। त्वम् अत्र **आगच्छ**।
3. शिष्याः अध्यापकं निवेदयन्ति। भवान् अस्मान् **पाठयतु**।
4. छात्रः अध्यापकं पृच्छति। किम् इदानीम् अहं **गच्छानि** ?
5. जनकः पुत्रम् आदिशति। त्वम् इदानीं विद्यालयं **गच्छ**।
6. जननी इच्छति – पुत्राः **पठन्तु**।
7. अग्रजः इच्छति – अनुजः स्वस्थः **भवतु**।
8. सज्जनाः इच्छन्ति – सर्वे मित्रवत् **व्यवहरन्तु**।
9. संयोजकः गायकं प्रार्थयति – भवान् गीतं **गायतु**।
10. धनिकः सेवकम् आदिशति – त्वम् एतत् कार्यं **कुरु**।

---

## अभ्यासः– 14

I. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

| | | | | |
|---|---|---|---|---|
| उदा० – पठ् | प्र० | पठतु | पठताम् | पठन्तु |
| | म० | पठ | पठतम् | पठत |
| | उ० | पठानि | पठाव | पठाम |
| 1. लिख् | प्र० | .................... | .................... | .................... |
| | म० | .................... | .................... | .................... |
| | उ० | .................... | .................... | .................... |
| 2. गच्छ् | प्र० | .................... | .................... | .................... |
| | म० | .................... | .................... | .................... |
| | उ० | .................... | .................... | .................... |

www.thearyasamaj.org


| | | | | |
|---|---|---|---|---|
| 3. खाद् | प्र० | ............ | ............ | ............ |
| | म० | ............ | ............ | ............ |
| | उ० | ............ | ............ | ............ |
| 4. पिब् | प्र० | ............ | ............ | ............ |
| | म० | ............ | ............ | ............ |
| | उ० | ............ | ............ | ............ |
| 5. हस् | प्र० | ............ | ............ | ............ |
| | म० | ............ | ............ | ............ |
| | उ० | ............ | ............ | ............ |

II. द्विवचनरूपाणि बहुवचनरूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| यथा– | 1. | खाद | खादतम् | खादत |
| | 2. | पठतु | ............ | ............ |
| | 3. | तिष्ठ | ............ | ............ |
| | 4. | खादानि | ............ | ............ |
| | 5. | जिघ्रतु | ............ | ............ |
| | 6. | शृणु | ............ | ............ |
| | 7. | आगच्छानि | ............ | ............ |

III. आज्ञार्थकवाक्यानि लिखन्तु–

| | | |
|---|---|---|
| यथा– 1. सः पठति। | 1. सः पठतु। |
| 2. त्वं पठसि। | 2. ............ ............ । |
| 3. सः गच्छति। | 3. ............ ............ । |
| 4. ते जलं पिबन्ति। | 4. ............ ............ ............ । |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| 5. | छात्राः पठन्ति । | 5. | .................. | .................. । |
| 6. | यूयं गच्छथ । | 6. | .................. | .................. । |
| 7. | एते हसन्ति । | 7. | .................. | .................. । |
| 8. | आवां गच्छावः । | 8. | .................. | .................. । |
| 9. | भवती आगच्छति । | 9. | .................. | .................. । |
| 10. | भवन्तौ लिखतः । | 10. | .................. | .................. । |
| 11. | भवन्तः उपदिशन्ति । | 11. | .................. | .................. । |
| 12. | वानराः खादन्ति । | 12. | .................. | .................. । |
| 13. | मयूराः नृत्यन्ति । | 13. | .................. | .................. । |
| 14. | मेघाः गर्जन्ति । | 14. | .................. | .................. । |
| 15. | पुष्पाणि विकसन्ति । | 15. | .................. | .................. । |

IV. 'पठ्' धातोः उचितरूपेण रिक्तस्थानं पूरयन्तु–

यथा– 1. भोः छात्राः ! यूयं ध्यानेन पठत ।

2. हे रमेश ! त्वम् अपि सम्यक् .................. ।

3. बालिकाः ! शीघ्रं कक्ष्याम् आगत्य .................. ।

4. याः बालिकाः बहिः भ्रमन्ति ताः आगत्य .................. ।

5. युवां वार्तालापं न कुरुतम् । सावधानौ भूत्वा .................. ।

6. हरीशः बहिः अस्ति । सः अत्र आगत्य .................. ।

7. अहं विलम्बेन आगतवान् । किम् अहं कक्ष्याम् आगत्य .................. ?

V. रिक्तस्थानानि पूरयन्तु–

स्नाहि, प्रक्षालय, त्यज, आचर, पठ, उत्तिष्ठ, नमस्कुरु, वद, गच्छ, पिब

| | | | | | |
|---|---|---|---|---|---|
| 1. | प्रातः | उत्तिष्ठ । | 2. | मुखं | .................. । |
| 3. | शीतजलेन | .................. । | 4. | सूर्यं | .................. । |
| 5. | दुग्धं | .................. । | 6. | समयेन विद्यालयं | .................. । |
| 7. | सम्यक् | .................. । | 8. | सत्यं | .................. । |
| 9. | स्वाध्यायं मा | .................. । | 10. | सम्यक् | .................. । |

www.thearyasamaj.org



VI. उचितक्रियापदेन रिक्तस्थानं पूरयन्तु–

यथा– 1. यूयं विनयशीलाः ....भवत.... । ( भू )
2. न कदापि असत्यं .................... । ( वद् )
3. प्रश्नोत्तराणि - स्वयं .................... । ( लिख् )
4. स्वकार्यं स्वयं .................... । ( कृ )
5. ईश्वरं .................... । ( भज् )

VII. आज्ञार्थकपदानि रेखाङ्कनेन पृथक्कुर्वन्तु–

ददाति, आह्वयन्ति, स्नान्तु, कुरु, आचरसि, भवतु, पिबत, आगच्छति, करोषि, स्वीकरोतु

VIII. योजयन्तु–

| (क) | (ख) |
|---|---|
| मातृदेवो | नमत |
| सत्यं | चर |
| धर्मं | भव |
| स्वाध्यायं न | वद |
| आचार्यं | त्यज |

IX. उचितक्रियापदेन रिक्तस्थानं पूरयन्तु–

मा कुरु / कुरु

यथा– 1. चौर्यं ....मा.... ....कुरु.... ।
2. सत्कार्यं .................... ।
3. परपीडनं .......... .................... ।
4. परिश्रमं .................... ।
5. परनिन्दां .......... .................... ।

www.thearyasamaj.org



X. अर्थम्, पुरुषं वचनं च सूचयन्तु–

| | | | | |
|---|---|---|---|---|
| 1. | पिबानि | आज्ञार्थकः | उत्तमपुरुषः | एकवचनम् |
| 2. | शृणुत | ........ | ........ | ........ |
| 3. | पठसि | ........ | ........ | ........ |
| 4. | आगच्छ | ........ | ........ | ........ |
| 5. | पठाम | ........ | ........ | ........ |
| 6. | कुर्वन्तु | ........ | ........ | ........ |
| 7. | लिखन्ति | ........ | ........ | ........ |
| 8. | पिब | ........ | ........ | ........ |
| 9. | लिखानि | ........ | ........ | ........ |
| 10. | आगच्छथः | ........ | ........ | ........ |

XI. रूपाणि लिखन्तु–

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| यथा– 1. | खाद् | – | आज्ञार्थकः | – | प्रथमपुरुषः | – | बहुवचनम् | – | खादन्तु |
| 2. | कृ | – | आज्ञार्थकः | – | मध्यमपुरुषः | – | एकवचनम् | – | ........ |
| 3. | त्यज् | – | आज्ञार्थकः | – | मध्यमपुरुषः | – | बहुवचनम् | – | ........ |
| 4. | पिब् | – | आज्ञार्थकः | – | उत्तमपुरुषः | – | एकवचनम् | – | ........ |
| 5. | श्रु | – | आज्ञार्थकः | – | प्रथमपुरुषः | – | एकवचनम् | – | ........ |
| 6. | पठ् | – | आज्ञार्थकः | – | प्रथमपुरुषः | – | द्विवचनम् | – | ........ |
| 7. | चल् | – | आज्ञार्थकः | – | उत्तमपुरुषः | – | द्विवचनम् | – | ........ |
| 8. | धाव् | – | आज्ञार्थकः | – | मध्यमपुरुषः | – | द्विवचनम् | – | ........ |
| 9. | भ्रम् | – | आज्ञार्थकः | – | उत्तमपुरुषः | – | बहुवचनम् | – | ........ |
| 10. | क्रीड् | – | आज्ञार्थकः | – | प्रथमपुरुषः | – | बहुवचनम् | – | ........ |

www.thearyasamaj.org

# 15. पञ्चदशः पाठः

## वीराङ्गना लक्ष्मीबाई

**लङ्—लकारः, भूतकालः**



अस्माकं राष्ट्रं भारतवर्षम्। 1947 (एकसहस्र-नवशत-सप्तचत्वारिंशत्) तमे ईश्वीये वर्षे भारतदेशः स्वतन्त्रः **अभवत्**। आँग्लदेशीयाः अत्र शासनम् **अकुर्वन्**। स्वाधीनतायै अनेकानि आन्दोलनानि **अभवन्**। स्वतन्त्रतायै देशभक्ताः धनम् **अयच्छन्**। युवकाः स्वप्राणान् **अत्यजन्**। लक्ष्मीबाई एका प्रमुखा सेनानायिका **आसीत्**। तस्याः जनकः जननी च बिठूरराज्ये **अवसताम्**। लक्ष्मीबाई शस्त्रज्ञाने अश्वारोहणे च निपुणा **आसीत्**। तस्याः विवाहः गङ्गाधरेण सह **अभवत्**। गङ्गाधररावस्य असमये एव मृत्युः **अभवत्**। आँग्लसेनानायकः ह्यूरोजः **अकथयत्** – "राज्ञी आत्मसमर्पणं करोतु" इति। वीराङ्गना लक्ष्मीबाई **अवदत्**–"भारतीया नारी प्राणान् त्यजति। किन्तु शत्रोः अग्रे समर्पणं न करोति। झाँसी–राज्यं मम अस्ति। अहं झाँसी–राज्यं न दास्यामि" इति।

सा आँग्लैः सह भीषणं युद्धम् **अकरोत्**। अन्ते सा प्राणान् **अत्यजत्**। अद्यापि झाँसीदुर्गे गुञ्जितान् स्वरान् जनाः स्मरन्ति।

## अभ्यासः – 15

**I. उत्तराणि लिखन्तु–**

उदा०– 1. भारतदेशः कस्मिन् वर्षे स्वतन्त्रः अभवत् ?

उ०– भारतदेशः 1947 तमे वर्षे स्वतन्त्रः अभवत्।

2. अत्र के शासनम् अकुर्वन् ?

उ०– ........................................................................................................।

3. देशभक्ताः स्वतन्त्रतायै किम् अयच्छन् ?

उ०– ........................................................................................................।

4. लक्ष्मीबाई कीदृशी सेनानायिका आसीत् ?

उ०– ........................................................................................................।

www.thearyasamaj.org



5. स्वतन्त्रतायै युवकाः किम् अकुर्वन् ?

उ० – ............................................................ ।

6. लक्ष्मीबाई कयोः निपुणा आसीत् ?

उ० – ............................................................ ।

7. लक्ष्मीबाई किं न अत्यजत् ?

उ० – ............................................................ ।

8. लक्ष्मीबाई किम् अत्यजत् ?

उ० – ............................................................ ।

II. ध्यानेन पठन्तु–

| | एक० | द्वि० | बहु० |
|---|---|---|---|
| प्र० पु० | अपठत् | अपठताम् | अपठन् |
| म० पु० | अपठः | अपठतम् | अपठत |
| उ० पु० | अपठम् | अपठाव | अपठाम |

✍ मञ्जूषातः पठ्–धातोः उचितं रूपं चित्वा रिक्तस्थानानि पूरयन्तु–

1. रमेशः / सीता पुस्तकम् ............................ ।
2. सः / सा ............................ ।
3. रमेशः सीता च पुस्तकम् ............................ ।
4. रमेशः, सीता, सर्वेशः च पुस्तकम् ............................ ।
5. किं त्वं पुस्तकम् ............................ ?
6. किं युवां पुस्तकम् ............................ ?
7. किं यूयं पुस्तकम् ............................ ?
8. किम् अहं पुस्तकम् ............................ ?
9. किम् आवां पुस्तकम् ............................ ?
10. किं वयं पुस्तकम् ............................ ?

www.thearyasamaj.org



III. कः कुत्र अगच्छत् इति अधोनिर्दिष्टम् अस्ति। तत्र रिक्तं पूरयन्तु–

यथा– 1. अहं ग्रीष्मकाले काशीम् अगच्छम्।

2. रमेशः गतचैत्रमासे अयोध्याम् ........................ ।

3. रमेशः सीता च गतवैशाखमासे वाराणसीम् ........................ ।

4. सर्वे बालकाः बालिकाश्च गते ज्येष्ठमासे हिमाचलप्रदेशम् ........................ ।

5. अहं तु ग्रीष्मावकाशे कुत्रापि न ........................ ।

6. युवाम् आषाढमासे कुत्र ........................ ?

7. आवां गतवर्षे जयपुरम् ........................ ।

8. यूयं कदा चेन्नैनगरम् ........................ ?

9. वयं गतमासे एव अमृतसरनगरम् ........................ ।

10. किं त्वं गतवर्षे विदेशम् ........................ ?

11. ते बालकाः भ्रमणाय गतवर्षे कुत्र ........................ ?

12. ताः बालिकाः गतवर्षे पठनाय गुरुकुलम् ........................ ।

IV. इतरवचनरूपाणि लिखन्तु–

| | एक० | द्वि० | बहु० |
|---|---|---|---|
| 1. | अभवत् | ........................ | ........................ |
| 2. | अयच्छत् | ........................ | ........................ |
| 3. | ........................ | ........................ | अत्यजन् |
| 4. | ........................ | अस्मरताम् | ........................ |
| 5. | अकरोत् | ........................ | ........................ |
| 6. | आसीत् | ........................ | ........................ |
| 7. | अयच्छः | ........................ | ........................ |
| 8. | अस्मरम् | ........................ | ........................ |
| 9. | ........................ | ........................ | अभवत |
| 10. | ........................ | अलिखाव | ........................ |

www.thearyasamaj.org



V. अधोनिर्दिष्टानि रूपाणि पुरुषानुगुणं विभजन्तु–

अकरोत्, अकरवम्, अयच्छः, अपठाम, अवदः, अस्मराम, अश्रृणोत्, अलिखाव, अगच्छतम्, आसीत्, आसम्, अक्रीडत, अत्यजन्, अमिलताम्, आसीः

| प्र० पु० | म० पु० | उ० पु० |
| --- | --- | --- |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

VI. एतानि वाक्यानि भूतकाले लिखन्तु–

उदा०– 1. सः पाठं पठति। सः पाठम् अपठत्।

2. बालकः ग्रन्थं पश्यति। ............ ............ ............ ।

3. जनाः कार्यं कुर्वन्ति। ............ ............ ............ ।

4. भवन्तः सत्यं वदन्ति। ............ ............ ............ ।

5. त्वं विद्यालयं गच्छसि। ............ ............ ............ ।

6. अहं घटनां स्मरामि। ............ ............ ............ ।

7. वयं गीतं गायामः। ............ ............ ............ ।

8. तौ वृक्षं स्पृशतः। ............ ............ ............ ।

9. यूयं चित्रं रचयथ। ............ ............ ............ ।

www.thearyasamaj.org

# 16. षोडशः पाठः

## ग्रीष्मावकाशः

*लङ्लकारः, भूतकालः*

विजयः – अजय ! ग्रीष्मावकाशे त्वं कुत्र **अगच्छः** ?

अजयः – विजय ! अहं ग्रीष्मावकाशे अरुणाचलप्रदेशम् **अगच्छम्**।

विजयः – अहो ! अतिरमणीयः सः प्रदेशः।

अजयः – आम्, तत्र याक-पशुम् **अपश्यम्**। दिग्फुरी-नदीम् **अपश्यम्**।

विजयः – किं त्वं गोम्पा-मन्दिरं न **अपश्यः** ?

अजयः – मया सह मम जननी जनकः च **आस्ताम्**। वयं सर्वे गोम्पा-मन्दिरम् **अगच्छाम**।

विजयः – यूयं कदा ततः **आगच्छत** ?

अजयः – वयं गतमासे एव **आगच्छाम**।

विजयः – किं तव पितामहः पितामही च तत्र न **अगच्छताम्** ?

अजयः – न। तौ हरिद्वारम् **अगच्छताम्**। तत्र गङ्गायां स्नानम् **अकुरुताम्**। भारतमाता इति मन्दिरम् **अपश्यताम्**।

विजयः – अहो ! रम्या अस्माकं भारतभूमिः।

अजयः – आम्, न केवलं रम्या, अपितु तपोभूमिः ज्ञानभूमिः च।

---

### अभ्यासः– 16

I. 'क' स्तम्भस्य वाक्यांशान् 'ख' स्तम्भस्य वाक्यांशैः मेलयन्तु

| क | | ख | |
|---|---|---|---|
| क. | अहम् अरुणाचलप्रदेशम् | 1. | कुत्र अगच्छः ? |
| ख. | अहं याक | 2. | ततः आगच्छत ? |
| ग. | त्वं ग्रीष्मावकाशे | 3. | पशुम् अपश्यम् । |
| घ. | मया सह मम जननी | 4. | अगच्छम्। |
| ङ. | यूयं कदा | 5. | स्नानम् अकुरुताम् । |
| च. | वयं गतमासे | 6. | मन्दिरं न अपश्यः ? |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| छ. | किं तव पितामहः | 7. | जनकः च आस्ताम् ? |
| ज. | तौ गङ्गायां | 8. | मन्दिरम् अपश्यताम् । |
| झ. | किं त्वं गोम्पा | 9. | एव आगच्छाम । |
| ञ. | तौ भारतमाता इति | 10. | पितामही च तत्र न अगच्छताम् ? |

| | | | |
|---|---|---|---|
| क. 4, | ख. ........ | ग. ........ | घ. ........ |
| ङ. ........ | च. ........ | छ. ........ | ज. ........ |
| झ. ........ | ञ. ........ | | |

II. इतरवचनरूपाणि लिखन्तुः–

| | | | |
|---|---|---|---|
| उदा०– 1. | अगच्छः | अगच्छतम् | अगच्छत |
| 2. | अपठः | ........ | ........ |
| 3. | अलिखम् | ........ | ........ |
| 4. | ........ | ........ | अकुर्वन् |
| 5. | आसीः | ........ | ........ |
| 6. | ........ | आस्व | ........ |
| 7. | अकरवम् | ........ | ........ |
| 8. | अकरोः | ........ | ........ |
| 9. | अक्षालयः | ........ | ........ |
| 10. | अनयम् | ........ | ........ |

III. उत्तराणि लिखन्तु–

1. अजयः ग्रीष्मावकाशे कुत्र अगच्छत् ?

   ........ ........................ ।

2. अरुणाचले सः कां नदीम् अपश्यत् ?

   ........ ........................ ।

3. पितामहः पितामही च किम् अकुरुताम् ?

   ........ ........................ ।

www.thearyasamaj.org



4. अजयेन सह के के अगच्छन् ?

........................ ........................................................................... ।

5. भारतभूमिः कीदृशी ?

........................ ........................................................................... ।

IV. उचितैः रूपैः रिक्तस्थानानि पूरयन्तु–

| | | |
|---|---|---|
| अलिखः | अलिखतम् | अलिखत |
| अलिखम् | अलिखाव | अलिखाम |

| | | |
|---|---|---|
| अगच्छः | अगच्छतम् | अगच्छत |
| अगच्छम् | अगच्छाव | अगच्छाम |

उदा०– 1. अहं पत्रम् अलिखम् ।

2. त्वं ग्रामम् ........................ ।
3. वयं कथाम् ........................ ।
4. यूयं गीतम् ........................ ।
5. अहं काशीम् ........................ ।
6. वयं विपणिम् ........................ ।
7. यूयं पाठम् ........................ ।
8. यूयं गृहम् ........................ ।
9. आवां पदानि ........................ ।
10. आवां विद्यालयम् ........................ ।

V. गणे विजातीयं रूपं रेखाङ्कनेन पृथक्कुर्वन्तु–


1. अलिखः, अगच्छः, अपठः, अनश्वः ।
2. अक्रीडम्, अगायम्, धर्मम्, अपठम् ।
3. अलिखतम्, अपठतम्, अपठः, अवदम् ।
4. अखादाम, अपिबाम, अवदाम, वदामः ।
5. गतः, अगच्छत्, अक्रीडत्, अगायत ।
6. अवदत्, अनृत्यम्, अक्षालयत्, अतिष्ठत् ।

www.thearyasamaj.org

# 17. सप्तदशः पाठः

**क्तवतु–प्रत्ययः**

## कोणार्कः



पूजावकाशे अहं स्वमित्रैः सह कोणार्कमन्दिरं द्रष्टुम् अर्कक्षेत्रं **गतवान्** आसम्। वयं सर्वे तत्र प्रथमवारं **गतवन्तः** आस्म। अस्माभिः सह अस्माकं शिक्षिका तस्याः भगिनी च **गतवत्यौ** आस्ताम्। अस्माकं ज्ञानाय शिक्षिका कोणार्कविषये अस्मान् **बोधितवती**। सा अस्माकं पुरतः मन्दिरस्य विवरणं **प्रस्तुतवती**।

कोणार्कमन्दिरम् उत्कलप्रदेशस्य वङ्गोपसागरसमीपे अस्ति। तत्र सूर्यदेवस्य पूजा भवति। अतः पौराणिकाः तत् क्षेत्रम् अर्कक्षेत्ररूपेण **वर्णितवन्तः**। ऐतिहासिकाः कोणार्कस्य परिगणनं विश्वस्य सप्ताश्चर्येषु **कृतवन्तः**। वैदेशिकाः पर्यटकाः तस्य ''ब्लैकपगोडा'' इति अपरम् अपि नाम **कृतवन्तः**। अनन्तरं तत् नाम सर्वे **स्वीकृतवन्तः**।

कोणार्कः न केवलम् उत्कलस्य, अपितु समग्रस्य भारतवर्षस्य भूषणम् अस्ति। त्रयोदशशताब्द्याम् उत्कलीयाः कलाकाराः एतत् मन्दिरं **निर्मितवन्तः** इति ऐतिहासिकाः **प्रमाणितवन्तः**। कोणार्कमन्दिरस्य निर्माणविषये धर्मपदस्य किंवदन्ती प्रसिद्धा अस्ति इति अस्माकं शिक्षिका **उक्तवती**।

धर्मपदः तदा द्वादशवर्षीयः बालकः आसीत्। तावत् सः स्वजनकं विशुमहाराणाम् एकवारम् अपि न **दृष्टवान्** आसीत्। सः तु तस्य जन्मतः प्राक् प्रवासं **गतवान्** आसीत्। द्वादशसहस्रश्रमिकैः सह नृपः तं कोणार्कमन्दिरस्य निर्माणकार्ये **नियोजितवान्** आसीत्। विद्यालये धर्मपदस्य मित्राणि ''तस्य जनकः नास्ति'' इति आक्षेपं **कृतवन्तः**। दुःखितः सः जनन्यै सर्वं निवेदितवान्। ''द्वादशवर्षेभ्यः तस्य जनकः प्रवासे अस्ति'' इति जननी **उक्तवती**। ''जनकं द्रष्टुं गमिष्यामि'' इति जननीम् **उक्तवान्** धर्मपदः। ''जनकस्य परिचयं न जानासि'' इति उक्त्वा जननी तं **निवारितवती**। परन्तु धर्मपदः तत्र गन्तुं **प्रतिज्ञातवान्**। अन्ततो गत्वा जननी अनुमतिं **दत्तवती**। ''प्राङ्गणस्य वदरिकावृक्षस्य फलं गृहीत्वा गच्छतु'' इति जननी **उपदिष्टवती**। तेन जनकस्य परिचयो भविष्यति इति **उक्तवती**।

www.thearyasamaj.org



धर्मपदः प्रातः यात्रां **प्रारब्धवान्**। मार्गे सायंकालः अभवत्। सः कस्यचित् वृक्षस्य अधः रात्रियापनं **कृतवान्**। तत्र सः खगयोः वार्तां **श्रुतवान्**। तौ परस्परं **भाषितवन्तौ** आस्ताम्। 'श्वः द्वादशसहस्रश्रमिकाणां शिरश्छेदः भविष्यति' इति एकः **उक्तवान्**। ''किमर्थम्'' इति अपरः **पृष्टवान्**। ''कोणार्कमन्दिरस्य शिखरनिर्माणे श्रमिकाः असफलाः सन्ति। अतः नृपः तेषां प्राणदण्डम् **आदिष्टवान्** अस्ति'' इति प्रथमः **उत्तरितवान्**। ''परन्तु यदि कश्चित् सूर्योदयात् प्राक् शिखरनिर्माणं करिष्यति तर्हि तेषां प्राणरक्षा भविष्यति'' इति **सूचितवान्**।

गयोः वार्तां श्रुत्वा धर्मपदः मन्दिरं प्रति **धावितवान्**। सः मातुः मुखात् एतत् कौशलं **श्रुतवान्** आसीत्। मन्दिरम् आरुह्य सः शिखरं **निर्मितवान्**। एतद् रहस्यं नृपः न जानातु इति कारणात् सः मन्दिरशिखरात् समुद्रजलं प्रति **कूर्दितवान्**। स्वप्राणान् च **त्यक्तवान्**। एवं सः स्वजनकस्य अन्येषां च श्रमिकाणां प्राणरक्षां **कृतवान्**।

कोणार्कस्य गात्रेषु उत्कीर्णाः उत्कृष्टाः भास्करकलाः तदानी पर्यटकान् **आकृष्टवत्यः**, इदानीम् अपि आकर्षन्ति।

---

## अभ्यासः– 17

I. उदाहरणानुसारं पूरयन्तु–

| | | | एक० | द्वि० | बहु० |
|---|---|---|---|---|---|
| (क) | पुं०– | 1. | गतवान् | गतवन्तौ | गतवन्तः |
| | | 2. | प्रमाणितवान् | .................. | .................. |
| | | 3. | .................. | .................. | नियोजितवन्तः |
| | | 4. | .................. | दृष्टवन्तौ | .................. |
| | | 5. | निर्मितवान् | .................. | .................. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 6. | .................... | कृतवन्तौ | .................... |
| 7. | .................... | .................... | निवेदितवन्तः |
| 8. | कूर्दितवान् | .................... | .................... |
| 9. | .................... | त्यक्तवन्तौ | .................... |
| 10. | .................... | .................... | उक्तवन्तः |
| (ख) स्त्री० – 1. | दृष्टवती | दृष्टवत्यौ | दृष्टवत्यः |
| 2. | श्रुतवती | .................... | .................... |
| 3. | .................... | दत्तवत्यौ | .................... |
| 4. | .................... | .................... | कृतवत्यः |
| 5. | उपदिष्टवती | .................... | .................... |
| 6. | .................... | बोधितवत्यौ | .................... |
| 7. | .................... | .................... | दत्तवत्यः |
| 8. | धावितवान् | .................... | .................... |
| 9. | .................... | प्रतिज्ञातवत्यौ | .................... |
| 10. | .................... | .................... | आकृष्टवत्यः |

II. एकवचनरूपाणि बहुवचने परिवर्तयन्तु–

| | | |
|---|---|---|
| उदा० – क. | पठितवान् | पठितवन्तः |
| ख. | त्यक्तवान् | .................... |
| ग. | श्रुतवान् | .................... |
| घ. | दत्तवान् | .................... |
| ङ. | अर्पितवान् | .................... |
| च. | उक्तवान् | .................... |

www.thearyasamaj.org



III. बहुवचनरूपाणि द्विवचने परिवर्तयन्तु–

उदा० – क. जीवितवन्तः जीवितवन्तौ

ख. आनीतवन्तः ..........

ग. खादितवन्तः ..........

घ. पठितवन्तः ..........

ङ. दृष्टवन्तः ..........

च. सेवितवन्तः ..........

IV. द्विवचनरूपाणि एकवचने परिवर्तयन्तु–

उदा० – क. उत्थितवन्तौ उत्थितवान्

ख. प्राप्तवन्तौ ..........

ग. सुप्तवन्तौ ..........

घ. चलितवन्तौ ..........

ङ. आगतवन्तौ ..........

V. स्त्रीलिङ्गरूपाणि लिखन्तु–

उदा० – क. पूजितवान् पूजितवती

ख. हसितवान् ..........

ग. पृष्टवान् ..........

घ. अधीतवान् ..........

ङ. परित्यक्तवान् ..........

च. स्वीकृतवान् ..........

छ. धृतवान् ..........

www.thearyasamaj.org



VI. उचितपदेन रिक्तस्थानं पूरयन्तु–

| हसितवती, निवेदितवान्, पृष्टवती, दत्तवन्तौ, श्रुतवन्तः |
|---|

उदा० – क. मां दृष्ट्वा बालिका हसितवती ।

ख. पुत्रः जनकाय .................................... ।

ग. तौ छात्रौ परीक्षायाम् उत्तरपुस्तिकां लिखित्वा .................................... ।

घ. दर्शकाः गायकस्य गीतं .................................... ।

ङ. छात्रा अध्यापकं प्रश्नं .................................... ।

VII. कर्तृपदस्य क्रियापदस्य च स्त्रीलिङ्गरूपं प्रयुज्य वाक्यानि रचयन्तु–

उदा० – क. पितामहः कथां कथितवान् । पितामही कथां कथितवती ।

ख. पिता पुत्रं पाठितवान् । .................................... .................................... .................................... ।

ग. छात्रः विद्यालयं गतवान् । .................................... .................................... .................................... ।

घ. मातुलः मिष्टान्नम् आनीतवान् । .................................... .................................... .................................... ।

ङ. भ्राता गृहम् आगतवान् । .................................... .................................... .................................... ।

च. राजा राज्यं शासितवान् । .................................... .................................... .................................... ।

VIII. लिङ्गं निर्दिशन्तु–

| क्रीतवती, स्वीकृतवान्, पीतवान्, दृष्टवन्तौ, उक्तवती, श्रुतवत्यः |
|---|

यथा– क्रीतवती – स्त्री० ।

IX. विभागं कुर्वन्तु–

उदा० – क. आगतवान् आ – गम् + क्तवतु

ख. कृतवान् ....................................

ग. लिखितवान् ....................................

घ. प्रदत्तवान् ....................................

ङ. हृतवान् ....................................

www.thearyasamaj.org



X. पुंलिङ्गपदैः रिक्तस्थानानि पूरयन्तु–

| | | | | | |
|---|---|---|---|---|---|
| क. | हस् | + | क्तवतु | = | हसितवान् |
| ख. | धाव् | + | क्तवतु | = | .................... |
| ग. | कथ् | + | क्तवतु | = | .................... |
| घ. | स्था | + | क्तवतु | = | .................... |
| ङ. | दा | + | क्तवतु | = | .................... |
| च. | नी | + | क्तवतु | = | .................... |

XI. स्त्रीलिङ्गपदैः रिक्तस्थानं पूरयन्तु–

| | | | | | |
|---|---|---|---|---|---|
| क. | त्यज् | + | क्तवतु | = | त्यक्तवती |
| ख. | भ्रम् | + | क्तवतु | = | .................... |
| ग. | नृत् | + | क्तवतु | = | .................... |
| घ. | कृ | + | क्तवतु | = | .................... |
| ङ. | क्रीड् | + | क्तवतु | = | .................... |

XII. क्तवत्वन्तपदैः रिक्तस्थानं पूरयन्तु–

| | | |
|---|---|---|
| क. | पृच्छति | पृष्टवान् |
| ख. | शृणोति | .................... |
| ग. | पश्यति | .................... |
| घ. | हरति | .................... |
| ङ. | धरति | .................... |

XIII. एतेषां क्तवत्वन्त-पदानां मूलधातुं निर्दिशन्तु–

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| क. | उपदिष्टवान् | = | उप - दिश् | ख. | श्रुतवती | = | .................... |
| ग. | पृष्टवन्तः | = | .................... | घ. | खादितवन्तः | = | .................... |
| ङ. | उक्तवन्तः | = | .................... | च. | पीतवन्तः | = | .................... |
| छ. | धृतवत्यः | = | .................... | | | | |

www.thearyasamaj.org



## XIV. क–वर्गं ख–वर्गेण संयोजयन्तु–

| क–वर्गः | ख–वर्गः |
|---|---|
| दृष्टवती | पुंलिङ्गे एकवचनम् |
| दृष्टवान् | स्त्रीलिङ्गे बहुवचनम् |
| गीतवत्यौ | पुंलिङ्गे द्विवचनम् |
| उक्तवन्तौ | स्त्रीलिङ्गे एकवचनम् |
| नीतवत्यः | पुंलिङ्गे बहुवचनम् |
| धृतवन्तः | स्त्रीलिङ्गे द्विवचनम् |

## XV. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–

क. वयं ग्रामं .................. । (गतवन्तः / गतवन्तौ)

ख. सा गीतं .................. । (गीतवान् / गीतवती)

ग. चोराः आरक्षकान् दृष्ट्वा .................. । (पलायितवन्तः / पलायितवान्)

घ. दर्शकाः चलचित्रं दृष्ट्वा .................. । (रुदितवती / रुदितवन्तः)

ङ. मम परिवारस्य सदस्याः मां .................. । (प्रोत्साहितवन्तौ / प्रोत्साहितवन्तः)

## XVI. धातुषु क्तवतु-प्रत्ययं संयोज्य कोष्ठके यथा निर्दिष्टं तथा लिखन्तु–

क. गम् (स्त्रीलिङ्गे बहुवचनम्) – ..................

ख. सृ (पुंलिङ्गे एकवचनम्) – ..................

ग. दा (पुंलिङ्गे द्विवचनम्) – ..................

घ. हृ (स्त्रीलिङ्गे एकवचनम्) – ..................

ङ. चल् (पुंलिङ्गे बहुवचनम्) – ..................

च. धाव् (स्त्रीलिङ्गे द्विवचनम्) – ..................

www.thearyasamaj.org

# 18. अष्टादशः पाठः

## राणाप्रतापः

भविष्य-कालः

मेवाडराज्यं बहूनां शूराणां जन्मभूमिः । तस्य राजा उदयसिंहः आसीत् । उदयसिंहस्य शासनकाले मेवाडचित्तौडादीनि स्थानानि शत्रुवशं गतानि । उदयसिंहस्य मरणस्य अनन्तरं तत्पुत्रः राणाप्रतापः सिंहासनम् आरूढवान् ।



'हस्तच्युतानां भागानां प्रतिप्राप्तिः कथम्' इति विचिन्त्य सः पुरप्रमुखाणां सभाम् आयोजितवान् । तत्र सः प्रतिज्ञां कृतवान् – "चित्तौडस्थानं यावत् न **प्रतिप्राप्स्यामि** तावत् सुवर्णपात्रे भोजनं न **करिष्यामि** । राजप्रासादे वासं न **करिष्यामि** । मृदुतल्पे शयनम् अपि न **करिष्यामि**" इति । तदा पुरप्रमुखाः अवदन् – "राजन् ! भवान् एवं सुखं **त्यक्ष्यति** चेत् वयं कथं वा सुखम् **अनुभविष्यामः** ? अतः वयम् अपि सुखसाधनानि **त्यक्ष्यामः** । देशाय यथाशक्ति धनं **दास्यामः** । अस्मत्पुत्रान् सैन्यं प्रति **प्रेषयिष्यामः**" इति ।

एतदनन्तरं ग्रामप्रमुखाः अवदन् – "वयं धान्यागारं धान्येन **पूरयिष्यामः** । उत्तमकृषिं कृत्वा अधिकधान्यानि **उत्पादयिष्यामः** । ग्रामे आयुधानि **सज्जीकरिष्यामः** । युवकान् युद्धकलां **बोधयिष्यामः** । अद्यैव कार्यारम्भं **करिष्यामः**" इति । एतत् श्रुत्वा राणाप्रतापः अवदत् – "यदि वयं सर्वे सम्भूय कार्यं **करिष्यामः** तर्हि नष्टानि राज्यानि **प्रतिप्राप्स्यामः** एव । प्रमुखाः वयं यथा **व्यवहरिष्यामः** तथा जनाः **व्यवहरिष्यन्ति** । वयम् अनुकरणयोग्याः **भविष्यामः** चेत् समग्रः देशः प्रेरितः **भविष्यति** । जनाः यदि कष्टानि सोढुं सज्जाः **भविष्यन्ति**, तर्हि असाध्यम् अपि साध्यं **भविष्यति** । वयं पूर्णसन्नाहं **करिष्यामः** । योग्ये काले युद्धम् **उद्घोषयिष्यामः**" इति । तदा जनाः उत्थाय 'जयतु राणाप्रतापः, जयतु मेवाडराज्यम्' इति जयघोषं कृतवन्तः ।

www.thearyasamaj.org



ध्यानेन पठन्तु–

| | | |
|---|---|---|
| करिष्यति | करिष्यतः | करिष्यन्ति |
| करिष्यसि | करिष्यथः | करिष्यथ |
| करिष्यामि | करिष्यावः | करिष्यामः |

---

## अभ्यासः– 18

I. एतेषां भविष्यद्रूपाणि लिखन्तु–

उदा० – 1. करोति ......करिष्यति...... 2. अनुभवति ..................

3. प्राप्नोति .................. 4. प्रेषयति ..................

5. ददाति .................. 6. त्यजति ..................

7. पूरयति .................. 8. उत्पादयति ..................

9. बोधयति .................. 10. उद्घोषयति ..................

II. पुरुषवचनानुगुणं भविष्यद्रूपाणि लिखन्तु–

उदा० – 1. करोमि ......करिष्यामि...... 2. त्यजन्ति ..................

3. लिखामः .................. 4. पठावः ..................

5. क्रीडथ .................. 6. ददति ..................

7. गच्छसि .................. 8. जानामि ..................

III. उत्तराणि लिखन्तु–

1. कः सुवर्णपात्रेण भोजनं न करिष्यति ?

.............................................................................................................. ।

2. के धनं दास्यन्ति ?

.............................................................................................................. ।

3. के अधिकधान्यानि उत्पादयिष्यन्ति ?

.............................................................................................................. ।

www.thearyasamaj.org



4. जनाः कथं व्यवहरिष्यन्ति ?

........................................................................ ।

5. के युवकान् बोधयिष्यन्ति ?

........................................................................ ।

IV. उचितं रूपं चित्वा रिक्तस्थानं पूरयन्तु–

| पालयिष्यामः, पठिष्यन्ति, ज्ञास्यसि, खादिष्यथ, श्रोष्यन्ति |
|---|

1. बालकाः पाठं .................... ।
2. जनाः ध्वनिं .................... ।
3. वयं धर्मं .................... ।
4. यूयं फलं .................... ।
5. त्वं विषयं .................... ।

V. एतेषां वाक्यानां भविष्यद्रूपाणि लिखन्तु–

उदा० – 1. बालकः पाठं पठति । बालकः पाठं पठिष्यति ।

2. ते विद्यालयं गच्छन्ति । .................................... ।
3. छात्राः सूचनां पालयन्ति । .................................... ।
4. त्वं गीतं शृणोषि । .................................... ।
5. अहं धनं ददामि । .................................... ।
6. वयं विषयान् जानीमः । .................................... ।
7. आवां लेखनीः क्रीणीवः । .................................... ।
8. यूयं पत्रं प्रेषयथ । .................................... ।
9. भवन्तः कार्याणि कुर्वन्ति । .................................... ।
10. भवत्यः चित्रं दर्शयन्ति । .................................... ।

www.thearyasamaj.org

# 19. एकोनविंशः पाठः

## महीशूरपुरं प्रति प्रवासः

क्त्वा / ल्यप्

प्रियमित्र !

कुशली **खलु भवान् ? गते सप्ताहे वयं** महीशूरपुरं **दृष्ट्वा** आगतवन्तः। प्रवासविस्तरं श्रोतुं भवतः अपि कुतूहलं **स्यात् खलु ? अतः विस्तरेण** लिखामि।

प्रातः वयं **सार्धपञ्चवादने विद्यालयं प्राप्य** षड्वादने लोकयानम् आरूढवन्तः। प्रयाणसमये अहं पार्श्वासने **उपविश्य** प्रकृतिसौन्दर्यं दृष्टवान्। घण्टाद्वयात्मकं प्रयाणं **कृत्वा** वयं श्रीरङ्गपत्तनं प्राप्तवन्तः। तत्र रङ्गनाथमन्दिरं **दृष्ट्वा** टिप्पूप्रासादं च **विलोक्य** पक्षिधाम गतवन्तः।

तत्र विशालः **जलाशयः अस्ति। नौकायाम् उपविश्य** जलाशये विहारं कृतवन्तः। अध्यापकः एकैकं खगं **दर्शयित्वा** विवरणं **वदति स्म। जलाशये,** कारण्डवाः, हंसाः अन्ये खगाः च सञ्चरन्ति। ते अस्मान् दृष्ट्वा न भीताः। केचन **छात्राः तान् उद्दिश्य** पाषाणखण्डान् क्षिपन्ति स्म। नाविकः तान् **तर्जयित्वा** निवारितवान्। काश्चन बालिकाः **अवनम्य** मीनान् ग्रहीतुं प्रयत्नं कृतवत्यः। तदा नाविकः नौकां **कम्पयित्वा** हसितवान्। तदा बालिकाः भीतिं **प्राप्य** "हो हो" इति क्रन्दनं कृतवत्यः। नाविकः एव ताः **समाश्वास्य** नौकाम् अग्रे नीतवान्।

घण्टां यावत् **विहृत्य** वयं महीशूरपुरं गताः। तस्य नगरस्य आधुनिकं नाम 'मैसूरु' इति। चामुण्डी महिषासुरं **मर्दयित्वा** लोकं रक्षितवती। अतः तन्नगरस्य नाम 'महीशूरपुरम्' इति जातम्। महीशूरपुरे वयं राजप्रासादं जगन्मोहन-वस्तुसङ्ग्रहालयं च दृष्ट्वा चामुण्डीपर्वतं गतवन्तः। तत्रैव **भुक्त्वा** किञ्चित् **विश्रम्य** जन्तुशालां द्रष्टुं गताः।

सायंकाले वयं 'वृन्दावनं' गताः। वृन्दावनं रमणीयं स्थलम्। जनाः सायंकाले दीपैः **अलङ्कृत्य** तस्य शोभां वर्धयन्ति। वयं तत्र सुखेन **उपविश्य** चणकान् **खादित्वा** शीतलपेयं **पीत्वा** आनन्देन कालं यापितवन्तः।

सायं सप्तवादने ततः **प्रस्थाय** वयं यानम् आरूढवन्तः। प्रवासानुभवः अत्युत्तमः आसीत्। तं प्रवासं **स्मृत्वा स्मृत्वा** इदानीम् अपि आनन्दम् अनुभवामि अहम्। भवतः मातामह्यै मम प्रणामान् निवेदयतु। अन्यान् सर्वान् च यथोचितं कथयतु। पत्रस्य उत्तरं विलिख्य मां तोषयतु।

भावत्कः

विश्वासः

www.thearyasamaj.org



**क्त्वान्तरूपाणि**

| वर्त्तमानरूपम् | – | क्त्वान्तरूपम् |
|---|---|---|
| पश्यति | – | दृष्ट्वा |
| करोति | – | कृत्वा |
| दर्शयति | – | दर्शयित्वा |
| तर्जयति | – | तर्जयित्वा |
| कम्पयति | – | कम्पयित्वा |
| मर्दयति | – | मर्दयित्वा |
| भुङ्क्ते | – | भुक्त्वा |
| खादति | – | खादित्वा |
| पिबति | – | पीत्वा |
| स्मरति | – | स्मृत्वा |

**ल्यबन्तरूपाणि**

| वर्त्तमानरूपम् | – | ल्यबन्तरूपम् |
|---|---|---|
| प्राप्नोति | – | प्राप्य |
| उपविशति | – | उपविश्य |
| विलोकते | – | विलोक्य |
| उद्दिशति | – | उद्दिश्य |
| अवनमति | – | अवनम्य |
| समाश्वासयति | – | समाश्वास्य |
| विहरति | – | विहृत्य |
| विश्राम्यति | – | विश्रम्य |
| अलङ्करोति | – | अलङ्कृत्य |
| प्रतिष्ठते | – | प्रस्थाय |

📖 ध्यानेन पठन्तु–

यदा एकः कार्यद्वयं करोति तदा पूर्वकार्यवाचकस्य क्रियापदस्य "क्त्वा" प्रत्ययः भवति।

उदाहरणम्–

हरीशः खादति। हरीशः विद्यालयं गच्छति। हरीशः खादित्वा विद्यालयं गच्छति।

---

## अभ्यासः– 19

I. अधोलिखितधातूनां क्त्वान्तरूपाणि लिखन्तु–

| | | | | | |
|---|---|---|---|---|---|
| 1. | क्रीडति | .................... | 2. | गच्छति | .................... |
| 3. | स्नाति | .................... | 4. | नयति | .................... |
| 5. | जानाति | .................... | 6. | शृणोति | .................... |
| 7. | क्षालयति | .................... | 8. | मिलति | .................... |

📖 ध्यानेन पठन्तु–

यदा धातुः उपसर्गेण / उपपदेन युक्तः भवति तदा क्त्वाप्रत्ययस्य स्थाने ल्यप् प्रत्ययः भवति।

उदा०– वि + हा + ल्यप् = विहाय

प्र + दा + ल्यप् = प्रदाय

www.thearyasamaj.org



II. अधोलिखितानां ल्यबन्तरूपाणि लिखन्तु–

| | | | | | |
|---|---|---|---|---|---|
| 1. | प्रणमति | .................... | 2. | आगच्छति | .................... |
| 3. | विलिखति | .................... | 4. | निराकरोति | .................... |
| 5. | संस्मरति | .................... | 6. | उपदिशति | .................... |
| 7. | प्रक्षालयति | .................... | 8. | आकर्षति | .................... |

III. क्त्वान्तेन ल्यबन्तेन वा पदेन रिक्तस्थानानि पूरयन्तु–

| | | | |
|---|---|---|---|
| 1. | नारायणं | .................... विद्यालयं गच्छ। | (प्रणमति) |
| 2. | पाठं | .................... शयनं करोतु। | (पठति) |
| 3. | अनुमतिं | .................... गृहं गच्छ। | (प्राप्नोति) |
| 4. | बालकाः | .................... गृहं गच्छन्ति। | (क्रीडन्ति) |
| 5. | अहं पुस्तकं | .................... विद्यालयं गच्छामि। | (स्वीकरोति) |

IV. अधोलिखितेषु समुचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–

**उत्थाय, प्रक्षाल्य, त्यक्त्वा, दृष्ट्वा, गत्वा**

1. परीक्षासमये छात्राः आलस्यं .................... पठन्ति।
2. सः उषः काले .................... पाठं पठति।
3. कर्मकरी पात्रं .................... गृहं गच्छति।
4. अहं चिकित्सालयं .................... वैद्यं पश्यामि।
5. बालकः सर्पं .................... भीतः भवति।

www.thearyasamaj.org



V. रूपं निर्दिशन्तु–

| | | | | | |
|---|---|---|---|---|---|
| क्षिप् + क्त्वा | = | क्षिप्त्वा | नम् + क्त्वा | = | ............ |
| क्री + तुमुन् | = | ............ | चि + तुमुन् | = | ............ |
| प्र + नम् + ल्यप् | = | प्रणम्य | उत् + स्था + ल्यप् | = | ............ |

VI. विभागं निर्दिशन्तु–

| | | | | | |
|---|---|---|---|---|---|
| उपसेव्य | = | उप+ सेव् + ल्यप् | सम्पूज्य | = | ............ |
| नर्तित्वा | = | ............ | गृहीत्वा | = | ............ |
| प्रेषयितुम् | = | ............ | कर्तयितुम् | = | ............ |

VII. गणे असमान-शब्दान् रेखाङ्कनेन पृथक्कुर्वन्तु–

1. दृष्ट्वा, गत्वा, पठित्वा, प्राप्य
2. आगत्य, विलोक्य, भुक्त्वा, विश्रम्य
3. प्रक्षाल्य, प्रस्थाय, प्रणम्य, उपविश्य
4. उपविश्य, उपदिश्य, उपकृत्य, निराकृत्य
5. कम्पयित्वा, मर्दयित्वा, स्मृत्वा, तर्जयित्वा

www.thearyasamaj.org

# 20. विंशः पाठः

तुमुन्

## गुरुकुलम्



अद्य यथा विद्यालयाः भवन्ति तथा प्राचीनकाले गुरुकुलानि भवन्ति स्म। गुरुः छात्रेभ्यः वासव्यवस्थां कल्पयित्वा बोधयति स्म। केचन शास्त्राणि **अध्येतुं** गुरुकुलम् आगच्छन्ति स्म। पुनः केचन शस्त्रकौशलं **प्राप्तुम्**। केचन वैद्याः **भवितुं** वेदान्तग्रन्थान् **पठितुं** च तत्र आगच्छन्ति स्म। यः यत् **प्राप्तुम्** इच्छति तत् ददाति स्म गुरुः। गुरुकुले छात्राः **स्नातुं** नदीं गच्छन्ति स्म। धेनुवृषभादीन् **चारयितुं** वनं गच्छन्ति स्म। कन्दमूलफलानि **आनेतुं** समिधः **सङ्ग्रहीतुं** च अरण्यं गच्छन्ति स्म। तण्डुलादिकं **प्राप्तुं** ग्रामान् गच्छन्ति स्म।

गुरुकुलं **चालयितुं** नृपाः साहाय्यं कुर्वन्ति स्म। धनिकाः अपि साहाय्यं **कर्त्तुम्** उत्साहं दर्शयन्ति स्म। किन्तु गुरुः स्वावलम्बिजीवनं **यापयितुम्** इच्छति स्म। अतः तादृशं साहाय्यं **प्राप्तुं** न इच्छति स्म।

www.thearyasamaj.org



ध्यानेन पठन्तु–

(क) तुमुन्नन्तरूपाणि–

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| पठति | – | पठितुम् | भवति | – | भवितुम् | प्राप्नोति | – | प्राप्तुम् |
| जानाति | – | ज्ञातुम् | आनयति | – | आनेतुम् | सङ्गृह्णाति | – | सङ्ग्रहीतुम् |
| यापयति | – | यापयितुम् | चालयति | – | चालयितुम् | स्नाति | – | स्नातुम् |

(ख) वर्तमानकाल–क्रियापदस्य 'स्म'–योजनेन भूतकालार्थः प्राप्यते–

| | वर्तमानक्रियापदानि | 'स्म'–योजनेन भूतकालार्थः |
|---|---|---|
| उदा०– | करोति | करोति स्म। |
| | वसति | वसति स्म। |

## अभ्यासः– 20

I. अधोलिखितक्रियापदानां तुमुन्नन्तरूपाणि लिखन्तु–

1. क्रीडति = ..................  2. गच्छति = ..................
3. नयतु = ..................  4. लिखति = ..................
5. जानाति = ..................  6. क्रीणाति = ..................
7. करोति = ..................  8. स्मरति = ..................

II. जनाः किमर्थं कुत्र गच्छन्ति इति लिखन्तु–

उदा०– 1. पठनम् – विद्यालयः → छात्राः पठितुं विद्यालयं गच्छन्ति।

2. क्रयणम् – आपणः → ते ..................................।

3. स्नानम् – नदी → जनाः ..................................।

4. नमस्करणम् – देवालयः → भक्ताः ..................................।

5. क्रीडनम् – क्रीडाङ्गणम् → बालकाः ..................................।

www.thearyasamaj.org



III. उचितेन क्रियापदरूपेण रिक्तस्थानानि पूरयन्तु–

उदा० – 1. गुरुः छात्रान् पोषयति स्म।

2. गुरुः शास्त्राणि ........................ ।

3. छात्राः वनं ........................ ।

4. नृपाः साहाय्यं ........................ ।

5. धनिकाः उत्साहं ........................ ।

IV. **कृष्णः बाल्ये किं करोति स्म इति लिखन्तु–**

1. कृष्णः नवनीतं ........................ । (चोर्)
2. कृष्णः गोवृषभान् ........................ । (पालय्)
3. कृष्णः राक्षसान् ........................ । (संहर्)
4. कृष्णः गोपान् ........................ । (आनन्दय्)
5. कृष्णः गोपिकानां वस्त्राणि ........................ । (अपहर्)

www.thearyasamaj.org

# 21. एकविंशः पाठः

## जन्तुशाला

**तृतीया–विभक्तिः**



प्रियच्छात्राः ! शब्देन विना **मौनेन** आगच्छन्तु । अहं जन्तुशालां परिचाययिष्यामि । अत्र पश्यन्तु । अत्र खगाः सन्ति । **खगैः** सह कपोताः अपि सन्ति । अत्र सन्ति चिक्रोडाः । **तैः** सह श्वेतमूषकाः अपि सन्ति । अत्र आगच्छन्तु । एषः कृष्णमुखः वानरः । एषः सर्वान् **नेत्राभ्यां** कुतूहलेन पश्यति । ते हरिणाः । ते जनान् **भीत्या** पश्यन्ति । तत्रास्ति बकः । सः **एकपादेन** तिष्ठति । सः **चञ्च्वा** मीनान् गृह्णाति ।

एतां जन्तुशालां द्रष्टुं छात्राः **शिक्षकैः शिक्षिकाभिः** च सह आगच्छन्ति । **जनन्या जनकेन** च सह बालाः अपि आगच्छन्ति । केचन **लोकयानेन** आगच्छन्ति । केचन **कारयानेन** आगच्छन्ति । पुनः केचन **पादाभ्याम्** आगच्छन्ति । अत्रास्ति जलाशयः । अत्र जनाः **नौकया** विहारं कुर्वन्ति, भवन्तः **भ्रमणेन** श्रान्ताः खलु ? अत्र **सुखेन** उपविशन्तु । **आनन्देन** वार्तालापं कुर्वन्तु । किञ्चित्कालानन्तरं वयं **रेलयानेन** भ्रमणं करिष्यामः ।

www.thearyasamaj.org



सुभाषितानि–

(1)

श्रोत्रं **श्रुतेनैव** न **कुण्डलेन** **दानेन** पाणिः न तु **कङ्कणेन**।
विभाति कायः करुणापराणां **परोपकारेण** न **चन्दनेन**।।

(2)

दुर्जनः परिहर्तव्यः **विद्ययाऽ**लङ्कृतोपि सन्।
**मणिना** भूषितः सर्पः किं स नास्ति भयङ्करः।।

(3)

**अक्रोधेन** जयेत् क्रोधम्, असाधुं **साधुना** जयेत्।
जयेत् कदर्यं **दानेन**, जयेत् **सत्येन** चानृतम्।।

(4)

**दानेन** पाणिः न तु **कङ्कणेन**
**स्नानेन** शुद्धिः न तु **चन्दनेन**।
**मौनेन** तृप्तिः न तु **भोजनेन**
**ज्ञानेन** मुक्तिः न तु **मुण्डनेन**।।

---

## अभ्यासः– 21

I. रिक्तस्थानानि उचितैः पदैः पूरयन्तु–

1. छात्राः .................... .................... च सह जन्तुशालां गच्छन्ति। (शिक्षकाः, शिक्षिकाः)
2. बालकाः .................... .................... च सह उद्यानं गच्छन्ति। (जननी, जनकः)
3. सः .................... .................... च सह मेलां गच्छति। (बान्धवाः, मित्राणि)
4. अहम् .................... .................... च सह नगरं गच्छामि। (अनुजा, अग्रजः)
5. नृपः .................... .................... च सह विहारस्थलं गच्छति। (परिवारजनाः, सैनिकाः)

II. कः केन यानेन गच्छति ?

1. धनिकः .................... गच्छति। (कारयानम्)
2. जनाः .................... गच्छन्ति। (लोकयानम्)
3. बालकः .................... गच्छति। (द्विचक्रिका)
4. विहारप्रियाः.................... विहरन्ति। (नौका)
5. विदेशीयाः .................... गच्छन्ति। (विमानम्)

www.thearyasamaj.org



III. तृतीयारूपैः रिक्तस्थानानि पूरयन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| एतत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| तत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| किम् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| सर्व | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| भवत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| देवः | – | ........ | ........ | ........ |
| फलम् | – | ........ | ........ | ........ |
| लता | – | ........ | ........ | ........ |
| लेखनी | – | ........ | ........ | ........ |

www.thearyasamaj.org



IV. मञ्जूषायां प्रदत्तरूपस्य विभक्तिम्, वचनम्, अन्तिमवर्णं लिङ्गं च यथोदाहरणं यथास्थानं निर्दिशन्तु –

यथा–

तृतीया ........ एकवचनम्

अकारान्तः [देवेन] पुंलिङ्गः

| | | |
|---|---|---|
| देवेन | देवाभ्याम् | देवैः |
| फलेन | फलाभ्याम् | फलैः |
| लतया | लताभ्याम् | लताभिः |
| लेखन्या | लेखनीभ्याम् | लेखनीभिः |
| तेन | ताभ्याम् | तैः |
| तया | ताभ्याम् | ताभिः |

V. यथोदाहरणं रिक्तस्थानानि पूरयन्तु –

| | | | | |
|---|---|---|---|---|
| (क) | वृक्षः | वृक्षेण | वृक्षाभ्याम् | वृक्षैः |
| | छात्रः | ............ | ............ | ............ |
| | गजः | ............ | ............ | ............ |
| | अश्वः | ............ | ............ | ............ |
| | सन्देशः | ............ | ............ | ............ |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| (ख) | लता | लतया | लताभ्याम् | लताभिः |
| | स्नुषा | ................ | ................ | ................ |
| | विदिता | ................ | ................ | ................ |
| | आशा | ................ | ................ | ................ |
| | विदिशा | ................ | ................ | ................ |
| (ग) | गृहिणी | गृहिण्या | गृहिणीभ्याम् | गृहिणीभिः |
| | नदी | ................ | ................ | ................ |
| | अङ्कनी | ................ | ................ | ................ |
| | लेखनी | ................ | ................ | ................ |
| | सौदामिनी | ................ | ................ | ................ |
| (घ) | फलम् | फलेन | फलाभ्याम् | फलैः |
| | भवनम् | ................ | ................ | ................ |
| | अक्षरम् | ................ | ................ | ................ |
| | गगनम् | ................ | ................ | ................ |
| | उद्यानम् | ................ | ................ | ................ |
| (ङ) | एषः | एतेन | एताभ्याम् | एतैः |
| | एषा | ................ | ................ | ................ |
| | एतत् | ................ | ................ | ................ |

VI. रिक्तस्थानानि पूरयन्तु–

| | | | |
|---|---|---|---|
| 1. | लेखन्या | लेखनीभ्याम् | लेखनीभिः |
| 2. | बालिकया | बालिकाभ्याम् | ................ |
| 3. | ................ | तडागाभ्याम् | तडागैः |
| 4. | पत्रेण | ................ | पत्रैः |
| 5. | ................ | मक्षिकाभ्याम् | मक्षिकाभिः |
| 6. | मण्डुकेन | ................ | मण्डुकैः |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 7. | .................... | जलाभ्याम् | जलैः |
| 8. | अङ्कन्या | .................... | अङ्कनीभिः |
| 9. | .................... | एताभ्याम् | एताभिः |
| 10. | मालया | .................... | मालाभिः |
| 11. | देवेन | देवाभ्याम् | .................... |
| 12. | .................... | सर्वाभ्याम् | सर्वाभिः |
| 13. | भवत्या | भवतीभ्याम् | .................... |
| 14. | केन | .................... | कैः |
| 15. | .................... | एताभ्याम् | एतैः |
| 16. | कया | काभ्याम् | .................... |
| 17. | येन | .................... | यैः |
| 18. | भवता | .................... | भवद्भिः |
| 19. | .................... | गृहिणीभ्याम् | गृहिणीभिः |
| 20. | सत्येन | सत्याभ्याम् | .................... |

VII. उचितपदेन रिक्तस्थानानि पूरयन्तु–

पादैः, हस्ताभ्याम्, मुखेन, दन्तैः, नेत्राभ्याम्

1. वानरः .................... खादति।
2. बिडालः .................... पश्यति।
3. वृषभः .................... चर्वति।
4. हरिणः .................... धावति।
5. बालकः .................... उन्नयति।

VIII. उचितविभक्तिरूपेण रिक्तस्थानं पूरयन्तु–

1. महिलाः .................... वदन्ति। (मुख)
2. बालिका .................... नयति। (हस्त)
3. बालकः .................... गच्छति। (पाद)
4. पर्यटकाः .................... गच्छन्ति। (नौका)
5. बलीवर्दः .................... भारं वहति। (स्कन्ध)

www.thearyasamaj.org



IX. सह / विना इति पदाभ्यां रिक्तस्थानानि पूरयन्तु–

1. जलेन .................... मीनाः न जीवन्ति।
2. गौरी जनन्या .................... गृहम् आगच्छति।
3. दुःखेन .................... सुखं नास्ति।
4. अध्यापकेन .................... छात्रः आगच्छति।
5. यतिवरः ध्यानेन .................... न तिष्ठति।

X. वचनानि निर्दिशन्तु–

1. पादाभ्याम् द्विवचनम् 2. नखैः ....................
3. चक्रेण .................... 4. अम्बया ....................
5. दन्ताभ्याम् .................... 6. यानैः ....................
7. सुतया .................... 8. पुत्रीभ्याम् ....................
9. अङ्कनीभिः .................... 10. नद्या ....................

XI. योजयन्तु–

| (क) | (ख) |
|---|---|
| तेन | भगिन्या |
| तया | गृहेण |
| सर्वैः | मनुष्याभ्याम् |
| द्वाभ्याम् | कलिकाभिः |
| एताभिः | बालकैः |

XII. यथोदाहरणं योजयन्तु–

पाद् + आभ्याम् = पादाभ्याम्
जननी + भिः = ....................
कलिक् + आभिः = ....................
बालिक् + अया = ....................
वृक्ष् + एण = ....................

www.thearyasamaj.org



XIII. रूपाणि लिखन्तु–

| | एक० | द्वि० | बहु० |
|---|---|---|---|
| सर्व पुं० द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| किम् स्त्री० प्रथमा | ............ | ............ | ............ |
| लता स्त्री० तृतीया | ............ | ............ | ............ |
| अङ्गनी स्त्री० तृतीया | ............ | ............ | ............ |
| भवत् पुं० तृतीया | ............ | ............ | ............ |

XIV. उचितपदैः रिक्तस्थानानि पूरयन्तु–

1. भक्तः ............ पूजयति। (पुष्पेण / पुष्पाय)
2. पुत्रः ............ सह आगच्छति। (जनकौ / जनकेन)
3. सचिनतेन्दुलकरः ............ क्रीडति। (कन्दुकेन / कन्दुके)
4. वृद्धः ............ चलति। (दण्डः / दण्डेन)
5. ............ प्रकाशः भवति। (सूर्येण / सूर्यम्)
6. ............ सह उर्मिला न गच्छति। (सीता / सीतया)
7. ............ विना जीवनं न सिध्यति। (खाद्याभ्याम् / खाद्येन)

XV. एकवचनेन परिवर्तयन्तु–

तैः तेन
सर्वाभ्याम् ............
भवतीभिः ............
भवद्भ्याम् ............
नदीभ्याम् ............
सर्वैः ............

XVI. बहुवचनेन परिवर्तयन्तु–

1. रामेण रामैः
2. शास्त्राभ्याम् ............
3. कया ............
4. ताभ्याम् ............
5. गृहिणीभ्याम् ............

www.thearyasamaj.org

# 22. द्वाविंशः पाठः

## काशी

*चतुर्थी–विभक्तिः*

'काशी' एकं प्राचीनं नगरम् अस्ति। जनाः एतत् नगरं वाराणसीनगरम् इति अपि कथयन्ति। तत्र विश्वप्रसिद्धं विश्वनाथमन्दिरम् अस्ति। प्रतिदिनं बहवः भारतीयाः यात्रिकाः अत्र विश्वनाथस्य **दर्शनाय** आगच्छन्ति। वैदेशिकाः पर्यटकाः अपि **भ्रमणाय**, **विश्वनाथदर्शनाय**, **गङ्गादर्शनाय**, **शिक्षायै** **अनुसन्धानाय** च काशीम् आगच्छन्ति। भक्ताः, साधकाः दार्शनिकाः च ये काशीम् आगच्छन्ति ते सर्वप्रथमं गङ्गास्नानं कुर्वन्ति। गङ्गास्नानं कृत्वा ते शरीरेण पवित्राः भवन्ति। अनन्तरं ते विश्वनाथस्य **दर्शनाय** विश्वनाथमन्दिरं प्रविशन्ति। सर्वे "ॐ नमः शिवाय" इति उक्त्वा शिवलिङ्गं स्पृशन्ति। **शिवलिङ्गाय** विल्वपत्रं, पुष्पं दुग्धं च अर्पयन्ति। पूजकः **भक्तेभ्यः** प्रसादं पादोदकं च ददाति। भक्ताः अपि **पूजकाय** दक्षिणां यच्छन्ति।

सारनाथः अपि अत्र अस्ति। सारनाथः एकं बौद्धपीठम् अस्ति। तत्र अपि वैदेशिकाः गवेषकाः **गवेषणायै** आगच्छन्ति। अत्रत्यः बौद्धविहारः विशिष्टः अस्ति। बौद्धस्तूपम् अपि आकर्षकम् अस्ति। पर्यटकाः अत्र आगत्य **बुद्धप्रतिमायै** **बौद्धभिक्षुकेभ्यः** च **श्रद्धापुष्पम्** अर्पयन्ति। अत्र काशी-हिन्दू-विश्वविद्यालयः सम्पूर्णानन्द–संस्कृत-विश्वविद्यालयः च इति द्वौ **विश्वविद्यालयौ** प्रसिद्धौ स्तः। संस्कृतं, संस्कृतिं दर्शनं च पठितुम् अत्र छात्राः आगच्छन्ति। **अध्ययनाय** काशीम् उपवसन्ति। **छात्रेभ्यः**, **पर्यटकेभ्यः** च काशी अतीव रोचते।

www.thearyasamaj.org



## अभ्यासः– 22

I. के किमर्थं काशीम् आगच्छन्ति इति रिक्तस्थाने लिखन्तु–

1. वैदेशिकाः ............ काशीम् आगच्छन्ति। (भ्रमणम्)
2. विश्वेश्वरभक्ताः ............ काशीम् आगच्छन्ति। (दर्शनम्)
3. छात्राः ............ काशीम् आगच्छन्ति। (शिक्षा)
4. संशोधकाः ............ काशीम् आगच्छन्ति। (अनुसन्धानम्)
5. जनाः ............ काशीम् आगच्छन्ति। (गङ्गास्नानम्)

II. आवरणे दत्तस्य पदस्य चतुर्थ्यन्तरूपेण रिक्तस्थानं पूरयन्तु–

1. ॐ नमः ............ इति भक्ताः वदन्ति। (विश्वेश्वरः)
2. भक्ताः ............ बिल्वपत्रम् अर्पयन्ति। (शिवलिङ्गम्)
3. पूजकः ............ प्रसादं ददाति। (भक्ताः)
4. भक्ताः ............ दक्षिणां यच्छन्ति। (पूजकः)
5. पर्यटकाः ............ ............ च श्रद्धापुष्पं समर्पयन्ति।(बुद्धप्रतिमा, बौद्धभिक्षुकाः)

III. चतुर्थी–विभक्तौ शब्दरूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| एतत् | (पुं०) | ............ | ............ | ............ |
| | (नपुं०) | ............ | ............ | ............ |
| | (स्त्री०) | ............ | ............ | ............ |
| तत् | (पुं०) | ............ | ............ | ............ |
| | (नपुं०) | ............ | ............ | ............ |
| | (स्त्री०) | ............ | ............ | ............ |
| किम् | (पुं०) | ............ | ............ | ............ |
| | (नपुं०) | ............ | ............ | ............ |
| | (स्त्री०) | ............ | ............ | ............ |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| सर्व | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| भवत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |

संज्ञाशब्दाः–

| | | | |
|---|---|---|---|
| खगः | ........ | ........ | ........ |
| कलिका | ........ | ........ | ........ |
| अङ्कनी | ........ | ........ | ........ |
| पत्रम् | ........ | ........ | ........ |

IV. उदाहरणानुगुणं लिङ्गवचनादिकं निर्दिशन्तु–

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| चतुर्थीवि० अकारान्तः | वृक्षाय | एकवचनम् पुंलिङ्गः | ........ | वृक्षाभ्याम् | ........ | ........ | वृक्षेभ्यः | ........ |
| ........ | पत्राय | ........ | ........ | पत्राभ्याम् | ........ | ........ | पत्रेभ्यः | ........ |
| ........ | मालायै | ........ | ........ | मालाभ्याम् | ........ | ........ | मालाभ्यः | ........ |
| ........ | अङ्कन्यै | ........ | ........ | अङ्कनीभ्याम् | ........ | ........ | अङ्कनीभ्यः | ........ |
| ........ | एतस्मै | ........ | ........ | एताभ्याम् | ........ | ........ | एतेभ्यः | ........ |
| ........ | एतस्यै | ........ | ........ | एताभ्याम् | ........ | ........ | एताभ्यः | ........ |

www.thearyasamaj.org



V. उदाहरणानुगुणं रूपाणि लिखन्तु–

पुं० अ०–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| 1 | मण्डूकः– | मण्डूकाय | मण्डूकाभ्याम् | मण्डूकेभ्यः |
| 2. | मीनः– | .................. | .................. | .................. |
| 3. | खगः– | .................. | .................. | .................. |
| 4. | वायसः– | .................. | .................. | .................. |
| 5. | कूर्मः– | .................. | .................. | .................. |

नपु० अ०–

| | | | | |
|---|---|---|---|---|
| 1. | चित्रम्– | चित्राय | चित्राभ्याम् | चित्रेभ्यः |
| 2. | पात्रम्– | .................. | .................. | .................. |
| 3. | पत्रम्– | .................. | .................. | .................. |
| 4. | खनित्रम्– | .................. | .................. | .................. |
| 5. | लवित्रम्– | .................. | .................. | .................. |

स्त्री० आ०–

| | | | | |
|---|---|---|---|---|
| 1. | छुरिका– | छुरिकायै | छुरिकाभ्याम् | छुरिकाभ्यः |
| 2. | स्थालिका– | .................. | .................. | .................. |
| 3. | बालिका– | .................. | .................. | .................. |
| 4. | सिक्थवर्तिका– | .................. | .................. | .................. |
| 5. | अग्निपेटिका– | .................. | .................. | .................. |

स्त्री० ई०–

| | | | | |
|---|---|---|---|---|
| 1. | लेखनी– | लेखन्यै | लेखनीभ्याम् | लेखनीभ्यः |
| 2. | चालनी– | .................. | .................. | .................. |
| 3. | वेल्लनी– | .................. | .................. | .................. |
| 4. | गृहिणी– | .................. | .................. | .................. |
| 5. | विद्यार्थिनी– | .................. | .................. | .................. |

www.thearyasamaj.org



## VI. रिक्तस्थानं पूरयन्तु–

| | | | |
|---|---|---|---|
| 1. | गृहाय | गृहाभ्याम् | गृहेभ्यः |
| 2. | .................... | आरक्षकाभ्याम् | आरक्षकेभ्यः |
| 3. | एतस्यै | एताभ्याम् | .................... |
| 4. | .................... | जवनिकाभ्याम् | जवनिकाभ्यः |
| 5. | सर्वस्यै | .................... | सर्वाभ्यः |
| 6. | .................... | छात्राभ्याम् | छात्रेभ्यः |
| 7. | तस्मै | ताभ्याम् | .................... |
| 8. | .................... | पेटिकाभ्याम् | पेटिकाभ्यः |
| 9. | घट्यै | घटीभ्याम् | .................... |
| 10. | मापिकायै | .................... | मापिकाभ्यः |
| 11. | सैनिकाय | .................... | सैनिकेभ्यः |
| 12. | उपनेत्राय | उपनेत्राभ्याम् | .................... |
| 13. | .................... | भवद्भ्याम् | भवद्भ्यः |
| 14. | सर्वस्मै | सर्वाभ्याम् | .................... |
| 15. | गृहिण्यै | .................... | गृहिणीभ्यः |
| 16. | दूरदर्शनाय | .................... | दूरदर्शनेभ्यः |
| 17. | वृद्धाय | वृद्धाभ्याम् | .................... |
| 18. | कस्मै | .................... | केभ्यः |
| 19. | .................... | अध्यापकाभ्याम् | अध्यापकेभ्यः |
| 20. | मापिकायै | .................... | मापिकाभ्यः |

## VII. योजयन्तु–

| क | ख |
|---|---|
| तेभ्यः | बालिकायै |
| एताभ्यः | बालकाभ्याम् |
| तस्मै | मनुष्येभ्यः |
| एतस्यै | नदीभ्यः |
| ताभ्यां | बालकाय |

www.thearyasamaj.org



VIII. रिक्तस्थानं पूरयन्तु–

आरोग्याय, पठनाय, औषधाय, प्रवासाय, भ्रमणाय

1. छात्रः .................... विद्यालयं गच्छति।
2. पर्यटकः .................... नगरं गच्छति।
3. रुग्णः .................... वैद्यालयं गच्छति।
4. सः .................... औषधालयं गच्छति।
5. विद्यार्थिनी .................... विदेशं गच्छति।

IX. उचितविभक्तिप्रयोगेण रिक्तस्थानं पूरयन्तु–

| | | | |
|---|---|---|---|
| 1. | बालकः .................... | चषकं यच्छति। | (जनकः) |
| 2. | भक्ताः .................... | पुरीं गच्छन्ति। | (जगन्नाथदर्शनम्) |
| 3. | आपणिकः .................... | आपणं गच्छति। | (विक्रयणम्) |
| 4. | सज्जनाः .................... | उज्जयिनीं गच्छन्ति। | (कुम्भमेला) |
| 5. | यशोदा .................... | नवनीतं यच्छति। | (कृष्णः) |

X. विभक्तिं वचनं च पूरयन्तु–

| | | |
|---|---|---|
| भवत्यै | चतुर्थी | एकवचनम् |
| त्वया | .................... | .................... |
| अध्यापकम् | .................... | .................... |
| काकाय | .................... | .................... |
| तस्मै | .................... | .................... |
| महिलाम् | .................... | .................... |
| भगिनीभिः | .................... | .................... |
| फलानि | .................... | .................... |
| लतया | .................... | .................... |
| सैनिकैः | .................... | .................... |

www.thearyasamaj.org


XI. चतुर्थ्यन्तपदानि रेखाङ्कनेन पृथक्कुर्वन्तु–

पत्रिकायै, पाचिकायै, धनैः, मेघाय, फलेभ्यः, चालन्यै, तस्मै, एतस्मै, तेन, भवते

XII. रूपाणि लिखन्तु–

| | | | | |
|---|---|---|---|---|
| छुरिका | – | द्वितीया–द्विवचनम् | – | छुरिके |
| चषकः | – | चतुर्थी–बहुवचनम् | – | ................ |
| घटः | – | तृतीया–एकवचनम् | – | ................ |
| चमसः | – | चतुर्थी–एकवचनम् | – | ................ |
| दर्वी | – | चतुर्थी–द्विवचनम् | – | ................ |

XIII. मूलशब्दं निर्दिशन्तु–

| | | |
|---|---|---|
| प्रदर्शनीभिः | – | प्रदर्शनी |
| ग्रन्थालयैः | – | ................ |
| कुक्कुटाभ्याम् | – | ................ |
| देवालयाय | – | ................ |
| उद्यानानि | – | ................ |
| विद्यालयम् | – | ................ |

XIV. बहुवचनेन परिवर्तयन्तु–

| | | |
|---|---|---|
| एताभ्याम् (स्त्री० तृ०) | – | एताभिः |
| भवत्यै | – | ................ |
| बालकाय | – | ................ |
| लते (द्विती० द्वि०) | – | ................ |
| छात्राभ्याम् (च०) | – | ................ |

XV. एकवचनेन परिवर्तयन्तु–

| | |
|---|---|
| उपनेत्रे | उपनेत्रम् |
| खगान् | ................ |
| पुष्पेभ्यः | ................ |
| तडागैः | ................ |
| एताभ्यः | ................ |

www.thearyasamaj.org

# 23. त्रयोविंशः पाठः

**पञ्चमी–विभक्तिः**

## आश्रमः



एषः मुनिवरस्य आश्रमः। आश्रमस्य पार्श्वे एका लघुनदी प्रवहति। सा **महानद्याः** प्रभवति। नद्याः तीरे अस्ति आश्रमः। आश्रमे मुनिवरस्य शिष्याः अपि वसन्ति। ते प्रतिदिनं **मुनिवरात्** शास्त्राणि पठन्ति। ते **अरण्यात्** समिधः आनयन्ति। ते **ग्रामेभ्यः** भिक्षावस्तूनि आनयन्ति, पाककार्यं कुर्वन्ति। **नदीतः** जलम् आनीय वृक्षान् लताः च सिञ्चन्ति। **वृक्षेभ्यः** फलानि आनीय अतिथिसत्कारम् अपि ते कुर्वन्ति।

आश्रमपरिसरे हरिणाः, धेनवः इत्यादयः निवसन्ति। हिंस्रपशवः अपि निवसन्ति। परस्परं द्वेषः नास्ति आश्रमस्य परिसरे। अतः न **बिडालात्** बिभेति मूषकः, न **शुनकात्** बिभेति **बिडालः**, न **जनेभ्यः** बिभ्यति वानराः, न **क्रूरमृगेभ्यः** भीताः भवन्ति हरिणादयः।

ग्रामीणाः प्रतिदिनम् आश्रमम् आगच्छन्ति। ते **मुनिवरात्** उपदेशं शृण्वन्ति। '**धर्मात्** विना मुक्तिः सुखं वा नास्ति' इति मुनिवरः उपदिशति। सः जनान् **पापेभ्यः** रक्षति। 'अहिंसा परमो धर्मः', अतः '**हिंसातः** विरमन्तु' इत्यपि उपदिशति सः। ग्रामीणाः महिलाः **नदीतः** जलं नेतुम् आश्रमसमीपम् आगच्छन्ति। ताः शिष्यान् पुत्रवत् पश्यन्ति। **गृहात्** फलानि क्षीरं च आनीय समर्पयन्ति।

www.thearyasamaj.org



सुभाषितानि–

(1)

**अन्नात्** भवन्ति भूतानि **पर्जन्यात्** अन्नसम्भवः ।
**यज्ञाद्** भवति पर्जन्यः यज्ञः कर्म समुद्भवः ।।

(2)

**ध्यायतो** विषयान् पुंसः सङ्गस्तेषूपजायते ।
**सङ्गात्** सञ्जायते कामः **कामात्** क्रोधोऽभिजायते ।
**क्रोधात्** भवति सम्मोहः **सम्मोहात्** स्मृतिविभ्रमः ।
**स्मृतिभ्रंशात्** बुद्धिनाशः **बुद्धिनाशात्** प्रणश्यति ।।

(3)

**लोभात्** क्रोधः प्रभवति **क्रोधात्** द्रोहः प्रवर्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ।।

**अभ्यासः– 23**

I. उदाहरणानुसारं रूपनिर्देशं कुर्वन्तु–

उदा०– पञ्चमी / अकारान्तः — **पर्वतात्** — एकवचनम् / पुंलिङ्गः

1. पर्वतेभ्यः

2. नगरात्

3. नगर्याः

4. पेटिकायाः

5. तस्मात्

6. तेभ्यः

7. तस्याः

8. ताभ्यः

www.thearyasamaj.org



II. आश्रमे शिष्याः किं कुर्वन्ति ? रिक्तस्थानं पूरयन्तु–

1. शिष्याः .................... शास्त्राणि पठन्ति ।
2. शिष्याः .................... समिधः .................... ।
3. शिष्याः .................... भिक्षावस्तूनि आनयन्ति ।
4. शिष्याः .................... जलम् .................... ।
5. शिष्याः .................... फलानि .................... ।

III. आश्रमे कः कस्मात् न बिभेति इति लिखन्तु–

उदा०– बिडालः मूषकः – आश्रमे बिडालात् मूषकः न बिभेति ।

1. शुनकः बिडालः – आश्रमे .................... न बिभेति ।
2. व्याघ्रः हरिणः – आश्रमे .................... न बिभेति ।
3. जनाः वानराः – आश्रमे .................... न बिभ्यति ।
4. मानवाः सर्पाः – आश्रमे .................... न बिभ्यति ।
5. क्रूरमृगाः हरिणाः – आश्रमे .................... न बिभ्यति ।

IV. मुनिवरः किम् उपदिशति ? रिक्तस्थानं पूरयन्तु–

1. भो जनाः, भवन्तः .................... विरमन्तु । (हिंसा)
2. भो जनाः, भवन्तः .................... विरमन्तु । (पापः)
3. भो जनाः, भवन्तः .................... विरमन्तु । (कुकृत्य)
4. भो जनाः, भवन्तः .................... विरमन्तु । (परपीडन)
5. भो जनाः, भवन्तः .................... विरमन्तु । (अन्याय्य)

V. पञ्चम्यां शब्दरूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| एतत् | (पुं०) | .................... | .................... | .................... |
| | (नपुं०) | .................... | .................... | .................... |
| | (स्त्री०) | .................... | .................... | .................... |
| तत् | (पुं०) | .................... | .................... | .................... |
| | (नपुं०) | .................... | .................... | .................... |
| | (स्त्री०) | .................... | .................... | .................... |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| किम् | (पुं०) | .................... | .................... | .................... |
| | (नपुं०) | .................... | .................... | .................... |
| | (स्त्री०) | .................... | .................... | .................... |
| सर्व | (पुं०) | .................... | .................... | .................... |
| | (नपुं०) | .................... | .................... | .................... |
| | (स्त्री०) | .................... | .................... | .................... |
| भवत् | (पुं०) | .................... | .................... | .................... |
| | (नपुं०) | .................... | .................... | .................... |
| | (स्त्री०) | .................... | .................... | .................... |
| मृगः– | | .................... | .................... | .................... |
| सुता– | | .................... | .................... | .................... |
| देवी– | | .................... | .................... | .................... |
| रत्नम्– | | .................... | .................... | .................... |

VI. उदाहरणानुसारं रूपाणि लिखन्तु–

| | | | एक० | द्वि० | बहु० |
|---|---|---|---|---|---|
| अ० पुं०– | 1. | दण्डः | दण्डात् | दण्डाभ्याम् | दण्डेभ्यः |
| | 2. | सागरः | .................... | .................... | .................... |
| | 3. | विद्यालयः | .................... | .................... | .................... |
| | 4. | दीपः | .................... | .................... | .................... |
| | 5. | मेघः | .................... | .................... | .................... |
| अ० नपुं०– | 1. | अन्नम् | अन्नात् | अन्नाभ्याम् | अन्नेभ्यः |
| | 2. | घृतम् | .................... | .................... | .................... |
| | 3. | तक्रम् | .................... | .................... | .................... |
| | 4. | व्यञ्जनम् | .................... | .................... | .................... |
| | 5. | सूपम् | .................... | .................... | .................... |

www.thearyasamaj.org



| | | | | | |
|---|---|---|---|---|---|
| आ० स्त्री०– | 1. | तूलिका | तूलिकायाः | तूलिकाभ्याम् | तूलिकाभ्यः |
| | 2. | कलिका | .................... | .................... | .................... |
| | 3. | पुष्पमाला | .................... | .................... | .................... |
| | 4. | माला | .................... | .................... | .................... |
| | 5. | दोला | .................... | .................... | .................... |
| ई० स्त्री०– | 1. | वेणी | वेण्याः | वेणीभ्याम् | वेणीभ्यः |
| | 2. | दूरवाणी | .................... | .................... | .................... |
| | 3. | आकाशवाणी | .................... | .................... | .................... |
| | 4. | कर्कटी | .................... | .................... | .................... |
| | 5. | किङ्किणी | .................... | .................... | .................... |
| सर्व– | पुं० | | .................... | .................... | .................... |
| | नपुं० | | .................... | .................... | .................... |
| | स्त्री० | | .................... | .................... | .................... |

VII. रिक्तस्थानं पूरयन्तु–

| | | | |
|---|---|---|---|
| 1. | दीपात् | दीपाभ्याम् | दीपेभ्यः |
| 2. | मालायाः | .................... | मालाभ्यः |
| 3. | .................... | भवतीभ्याम् | भवतीभ्यः |
| 4. | चमसात् | चमसाभ्याम् | .................... |
| 5. | कथायाः | कथाभ्याम् | .................... |
| 6. | .................... | चषकाभ्याम् | चषकेभ्यः |
| 7. | मातामह्याः | .................... | मातामहीभ्यः |
| 8. | कस्याः | काभ्याम् | .................... |
| 9. | .................... | कविताभ्याम् | कविताभ्यः |
| 10. | सर्वस्मात् | .................... | सर्वेभ्यः |
| 11. | भवतः | भवद्भ्याम् | .................... |
| 12. | .................... | मसीभ्याम् | मसीभ्यः |
| 13. | कूपात् | कूपाभ्याम् | .................... |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| 14. | मरीचिकायाः | ............ | मरीचिकाभ्यः |
| 15. | ............ | तडागाभ्याम् | तडागेभ्यः |
| 16. | लतायाः | ............ | लताभ्यः |
| 17. | पितामह्याः | पितामहीभ्याम् | ............ |
| 18. | ............ | श्रीमतीभ्याम् | श्रीमतीभ्यः |
| 19. | देवात् | ............ | देवेभ्यः |

VIII. योजयन्तु–

| क | ख |
|---|---|
| तस्मात् | पुस्तकेभ्यः |
| तस्याः | गृहस्य |
| एतस्य | मातामह्याः |
| केभ्यः | स्थानात् |
| अस्य | मित्रस्य |

IX. उचितपदैः रिक्तस्थानानि पूरयन्तु–

1. ......वृक्षात्...... पत्राणि पतन्ति। (वृक्षः)
2. ............ पुष्पाणि पतन्ति। (लताः)
3. ............ नद्यः प्रवहन्ति। (पर्वताः)
4. ............ घृतं भवति। (दुग्धम्)
5. ............ विना सुफलं नास्ति। (श्रमः)

X. उचितपदैः रिक्तस्थानानि पूरयन्तु–

कलिकाभ्याम्, विद्यालयात्, आकाशात्, नयनाभ्याम्, पुष्परसात्

1. ............ जलं पतति।
2. छात्रः ............ आगच्छति।
3. ............ पुष्पाणि भवन्ति।
4. ............ मधु भवति।
5. ............ अश्रुकणाः पतन्ति।

www.thearyasamaj.org



XI. विभक्तिं वचनं च निर्दिशन्तु–

| | | |
|---|---|---|
| दुर्गायाः | पञ्चमी | एकवचनम् |
| जनकात् | .................... | .................... |
| जनन्यौ | .................... | .................... |
| सिंहाय | .................... | .................... |
| पत्रात् | .................... | .................... |
| तेन | .................... | .................... |
| एतस्याः | .................... | .................... |

XII. पञ्चम्यन्तपदानि रेखाङ्कनेन पृथक्कुर्वन्तु–

कथायाः, कवितायै, ललितनिबन्धात्, काव्येभ्यः, सर्गौ, पुराणाभ्याम्, शास्त्रात्, न्यायेन, वेदान्तात्

XIII. मूलशब्दं लिखन्तु–

दीपशिखायाः, धीवरैः, तक्षकौ, चषकाभ्याम्, गृहगोधिकाम्, चित्रकारात्, शास्त्रेभ्यः, कोषैः, गुहायै

XIV. द्विवचनरूपाणि लिखन्तु–

| | |
|---|---|
| गगनात् | गगनाभ्याम् |
| पत्रात् | .................... |
| जननीभ्यः | .................... |
| मालायाः | .................... |
| तस्याः | .................... |
| सर्वस्मात् | .................... |
| एताभ्यः | .................... |

XV. एकवचनरूपाणि लिखन्तु–

| | |
|---|---|
| चरणाभ्याम् | चरणेन |
| हस्तेभ्यः | .................... |
| छुरिकाभिः | .................... |
| जनकौ | .................... |
| पाठशालाभ्यः | .................... |
| भवतीभ्यः | .................... |

www.thearyasamaj.org

# 24. चतुर्विंशः पाठः

षष्ठी—विभक्तिः

## संस्कृतभाषा




संस्कृतं **भारतस्य** प्राचीनतमा भाषा अस्ति। 'एषा देवभाषा' इति लोके प्रसिद्धिः। सा च प्रसिद्धिः निर्मूला नास्ति। **अस्याः भाषायाः** व्याकरणं वैज्ञानिकम् अस्ति। इयं भाषा **वेदोपनिषत्शास्त्राणां** भाषा अस्ति। इयम् एव भाषा **पुराणानां, दर्शनानां** च भाषा अस्ति।

संस्कृतभाषा अतीव मधुरा अस्ति। **अस्माकं भारतीयपरम्परायाः सभ्यतायाः** च रक्षणम् अपि संस्कृतभाषया एव भवति। **संस्कृति-संस्कृतयोः** विशेषः सम्बन्धः अस्ति। "**भारतस्य** प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा" इति सुभाषितं प्रसिद्धम् अस्ति। **अस्माकं** सर्वकारेण **कलियुगाब्दस्य** 5201 तमं वर्षं (द्विसहस्रतमः क्रिस्ताब्दः) संस्कृत—वर्षरूपेण घोषितम् आसीत्। प्रतिवर्षं श्रावणपूर्णिमा संस्कृतदिनत्वेन आचर्यते।

महाभारत—रामायणयोः कथा अपि संस्कृतेन लिखिता अस्ति। **भास-श्रीहर्ष-कालिदासादीनां** भाषा अपि संस्कृतम् आसीत्। वेदोपनिषदादयः संस्कृते सन्ति। अद्वितीया भगवद्गीता अपि संस्कृते एव अस्ति। अनेकानि दर्शनानि शास्त्राणि च संस्कृते एव सन्ति। **भारतीयचिन्तनस्य** सारः एव संस्कृते अस्ति। अतः संस्कृतं **भारतस्य** सांस्कृतिकभाषा अस्ति।

www.thearyasamaj.org



सुभाषितानि–

ताराणां भूषणं चन्द्रः **नारीणां** भूषणं पतिः ।
पृथिव्याः भूषणं राजा विद्या **सर्वस्य** भूषणम् ।। 1 ।।

उदारस्य तृणं वित्तं **शूरस्य** मरणं तृणम् ।
**विरक्तस्य** तृणं भार्या **निस्पृहस्य** तृणं जगत् ।। 2 ।।

**तक्षकस्य** विषं दन्ते **मक्षिकायाः** च मस्तके ।
**वृश्चिकस्य** विषं पुच्छे सर्वाङ्गे **दुर्जनस्य** तत् ।। 3 ।।

## अभ्यासः– 24

I. रिक्तं स्थानम् उचितेन विभक्तिरूपेण पूरयन्तु–

1. संस्कृतं .................... प्राचीनतमा भाषा अस्ति । (भारतम्)
2. संस्कृतं .................................... भाषा अस्ति । (वेदोपनिषत्शास्त्राणि)
3. संस्कृतं .................... .................... .......... भाषा अस्ति । (पुराणानि दर्शनानि च)
4. संस्कृतं .................... .................... .......... भाषा अस्ति । (भारतीयपरम्परा सभ्यता च)
5. संस्कृतं .................................... भाषा अस्ति । (महाभारतरामायणे)

II. रिक्तं स्थानं "संस्कृतम्" इत्येतस्य उचितेन विभक्तिरूपेण पूरयन्तु–

1. रामायणकथा .................... रचिता अस्ति ।
2. वेदोपनिषदादयः .................... सन्ति ।
3. भारतीयभाषाः .................... समुत्पन्नाः ।
4. .................... मम विशेषश्रद्धा अस्ति ।
5. .................... व्याकरणं वैज्ञानिकम् अस्ति ।

www.thearyasamaj.org



III. षष्ठी–विभक्तौ शब्दरूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| एतत् | (पुं०) | एतस्य | एतयोः | एतेषाम् |
| | (नपुं०) | एतस्य | एतयोः | एतेषाम् |
| | (स्त्री०) | एतस्याः | एतयोः | एतासाम् |
| तत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| किम् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| सर्व | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| भवत् | (पुं०) | ........ | ........ | ........ |
| | (नपुं०) | ........ | ........ | ........ |
| | (स्त्री०) | ........ | ........ | ........ |
| देवः | – | ........ | ........ | ........ |
| लता | – | ........ | ........ | ........ |
| लेखनी | – | ........ | ........ | ........ |
| पुष्पम् | – | ........ | ........ | ........ |

www.thearyasamaj.org



IV. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

1. .................. छात्रस्य ..................

2. .................. छात्रयोः ..................

3. .................. छात्राणाम् ..................

4. .................. पत्रस्य ..................

5. .................. पत्रयोः ..................

6. .................. पत्राणाम् ..................

7. .................. मालायाः ..................

8. .................. मालयोः ..................

9. .................. मालानाम् ..................

V. रूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| (क) | तालः | तालस्य | तालयोः | तालानाम् |
| | पर्यङ्कः | .................. | .................. | .................. |
| | तल्पः | .................. | .................. | .................. |
| | सुधाखण्डः | .................. | .................. | .................. |
| | प्रदीपः | .................. | .................. | .................. |
| (ख) | वनम् | वनस्य | वनयोः | वनानाम् |
| | हरितम् | .................. | .................. | .................. |
| | वृन्ताकम् | .................. | .................. | .................. |
| | लशुनम् | .................. | .................. | .................. |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| (ग) | क्रीडा | क्रीडायाः | क्रीडयोः | क्रीडानाम् |
| | नायिका | .................... | .................... | .................... |
| | खञ्जा | .................... | .................... | .................... |
| | कुब्जा | .................... | .................... | .................... |
| | वृद्धा | .................... | .................... | .................... |
| (घ) | राज्ञी | राज्ञ्याः | राज्ञ्योः | राज्ञीनाम् |
| | अभिनेत्री | .................... | .................... | .................... |
| | कुक्कुटी | .................... | .................... | .................... |
| | मयूरी | .................... | .................... | .................... |
| | हंसी | .................... | .................... | .................... |
| (ङ) | सर्वः | .................... | .................... | .................... |
| | सर्वा | .................... | .................... | .................... |
| | सर्वम् | .................... | .................... | .................... |

VI. उदाहरणानुरूपं रिक्तस्थानं पूरयन्तु –

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| उदा० – | 1. | कूपस्य | कूपयोः | कूपानाम् |
| | 2. | चटकायाः | .................... | चटकानाम् |
| | 3. | .................... | कूप्योः | कूपीनाम् |
| | 4. | तृणस्य | तृणयोः | .................... |
| | 5. | वरस्य | .................... | वराणाम् |
| | 6. | कस्याः | कयोः | .................... |
| | 7. | सम्मार्जन्याः | .................... | सम्मार्जनीनाम् |
| | 8. | पादपस्य | पादपयोः | .................... |
| | 9. | .................... | आम्रयोः | आम्राणाम् |
| | 10. | सुधायाः | सुधयोः | .................... |
| | 11. | .................... | द्रोण्योः | द्रोणीनाम् |
| | 12. | एतस्य | एतयोः | .................... |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 13. | .................... | कटयोः | कटानाम् |
| 14. | भवत्याः | भवत्योः | .................... |
| 15. | कन्दुकस्य | .................... | कन्दुकानाम् |
| 16. | .................... | छुरिकयोः | छुरिकाणाम् |
| 17. | नट्याः | नट्योः | .................... |
| 18. | सर्वस्याः | .................... | सर्वासाम् |
| 19. | कस्य | कयोः | .................... |
| 20. | दोलायाः | .................... | दोलानाम् |

VII. उचितपदैः रिक्तस्थानानि पूरयन्तु–

जलजीवानाम्, सूर्यस्य, नदीनाम्, कृषकाणाम्, कोकिलस्य, काकानाम्, हस्तयोः

1. कोकिलस्य स्वरः मधुरः भवति।
2. .................... सङ्गमस्थानं पुण्यकारकं भवति।
3. कर्षणं .................... कार्यं भवति।
4. .................... स्वरः कर्कशः भवति।
5 जलं .................... वासः भवति।
6 .................... प्रकाशेन अन्धकारः नश्यति।
7 द्वयोः .................... दशनखाः भवन्ति।

VIII. उचितविभक्ति–प्रयोगेण रिक्तस्थानानि पूरयन्तु–

1. मधुमक्षिकाः पुष्पाणां रसं पिबन्ति। (पुष्पाणि)
2. .................... भूषणं मधुरभाषणम्। (मुखम्)
3. .................... अञ्जनं हितकरम्। (नेत्रे)
4. .................... गुञ्जनं प्रीतिकरम् अस्ति। (भ्रमराः)
5. .................... चञ्चलस्वभावः भवति। (वानराः)
6. .................... शाखा दीर्घा अस्ति। (वृक्षः)
7. .................... जलं पवित्रम् अस्ति। (गङ्गायमुने)

www.thearyasamaj.org



IX. एकवचनरूपाणि लिखन्तु–

| | |
|---|---|
| नराणाम् | नरस्य |
| लतयोः | ........................ |
| भवत्योः | ........................ |
| लेखनीनाम् | ........................ |
| नद्योः | ........................ |
| बालकयोः | ........................ |

X. द्विवचनरूपाणि लिखन्तु–

| | |
|---|---|
| छात्रस्य | छात्रयोः |
| वृद्धानाम् | ........................ |
| नीडानाम् | ........................ |
| जलस्य | ........................ |
| सरितायाः | ........................ |
| गृहिण्याः | ........................ |

XI. बहुवचनरूपाणि लिखन्तु–

| | |
|---|---|
| खगौ | खगाः |
| अध्यापकौ | ........................ |
| काकस्य | ........................ |
| मालायाः | ........................ |
| लेखन्योः | ........................ |
| तस्याः | ........................ |

XII. विभक्तिं वचनं च निर्दिशन्तु–

| | | | |
|---|---|---|---|
| 1. | कपोतस्य | षष्ठी | एकवचनम् |
| 2. | भगिनीनाम् | ........................ | ........................ |
| 3. | मशकेन | ........................ | ........................ |
| 4. | छात्राणाम् | ........................ | ........................ |
| 5. | एतस्मै | ........................ | ........................ |
| 6. | तस्याः | ........................ | ........................ |
| 7. | भवतीभिः | ........................ | ........................ |

XIII. षष्ठीविभक्त्यन्तपदानि रेखाङ्कनेन पृथक्कुर्वन्तु–

पादैः, नखानाम्, पुष्पस्य, कपोलात्, एतस्याः, एतेन, कस्मै, कस्याम्, जनकाय, जनन्याः

www.thearyasamaj.org

# 25. पञ्चविंशः पाठः

सप्तमी—विभक्तिः

## रथयात्रा



श्रीजगन्नाथदेवस्य रथयात्रा विश्वप्रसिद्धा अस्ति। एषा यात्रा प्रतिवर्षम् **आषाढे मासे**, **पुरुषोत्तमक्षेत्रे** प्रचलति। **अस्यां यात्रायां** भागं ग्रहीतुं भारतवर्षस्य विभिन्नेभ्यः प्रदेशेभ्यः विदेशेभ्यः च अनेके भक्ताः पर्यटकाः च पुरीम् आगच्छन्ति। ते पुरीम् आगत्य **त्रिषु रथेषु** जगन्नाथं, बलभद्रं सुभद्रां च दृष्ट्वा धन्याः भवन्ति। अस्माकं **भारतीयपरम्परायाम्** एवं प्रसिद्धिः अस्ति यत् "रथस्थस्य जगन्नाथस्य दर्शनात् पुनर्जन्म न भवति" इति। अस्माकं भारतीयानां **जगन्नाथ-बलभद्रयोः सुभद्रायां** च महती श्रद्धा अस्ति। वयं **तेषु, अन्येषु देवेषु देवतासु** च पूर्णरूपेण विश्वसिमः।

पुरुषोत्तमक्षेत्रस्य समीपे गुण्डिचामन्दिरम् अस्ति। देवी गुण्डिचा जगन्नाथस्य मातृष्वसा भवति। त्रयाणां देवानां रथाः सिंहद्वारात् आरभ्य **गुण्डिचामन्दिरं** यावत् गच्छन्ति। देव्याः सुभद्रायाः रथः अग्रजयोः रथयोः **मध्ये** चलति। नवदिनानि यावत् एते त्रयः गुण्डिचामन्दिरे तिष्ठन्ति। तत्र गत्वा भक्ताः देवानां दर्शनं कुर्वन्ति। भजनं कीर्तनं च कुर्वन्ति। रथयात्रायाः पूर्वं पुर्याः गजपतिराजः **त्रिषु रथेषु** गत्वा सुवर्णसम्मार्जन्या रथान् परिष्करोति। अनन्तरं **तेषु** सुगन्धजलं सिञ्चति। भक्ताः "जयतु जगन्नाथः" इति उक्त्वा रथस्य रज्जुं कर्षन्ति।

न केवलं जगन्नाथस्य, अपि तु **भारतवर्षे** अन्येषां देवानाम् अपि रथयात्राः भवन्ति। परन्तु **तासु सर्वासु** रथयात्रासु जगन्नाथस्य रथयात्रा विशिष्टा। एषः रथयात्रोत्सवः विश्वस्य जनान् पुरीं प्रति आकर्षति। **पुरुषोत्तमक्षेत्रे** वर्तमानः समुद्रः अपि पर्यटकानाम् आकर्षणबिन्दुः भवति।

www.thearyasamaj.org



सुभाषितानि–

अनभ्यासे विषं विद्या **अजीर्णे** भोजनं विषम् ।
विषं गोष्ठी दरिद्रस्य **भोजनान्ते** जलं विषम् ।। 1 ।।

विद्या मित्रं **प्रवासेषु** माता मित्रं **गृहेषु** च ।
व्याधितस्यौषधं मित्रं धर्मः मित्रं मृतस्य च ।। 2 ।।

मातृवत् **परदारेषु** **परद्रव्येषु** लोष्टवत् ।
आत्मवत् **सर्वभूतेषु** यः पश्यति स पश्यति ।। 3 ।।

ध्यानेन पठन्तु–

| | | | | |
|---|---|---|---|---|
| एतत् | (पुं०) | एतस्मिन् | एतयोः | एतेषु |
| | (नपुं०) | एतस्मिन् | एतयोः | एतेषु |
| | (स्त्री०) | एतस्याम् | एतयोः | एतासु |

**अभ्यासः– 25**

I. कः उत्सवः कदा–

उदा०– 1. आषाढमासः – जगन्नाथरथोत्सवः

**आषाढमासे जगन्नाथरथोत्सवः प्रचलति** ।

2. भाद्रपदमासः – गणेशचतुर्थी

........................................ ।

3. आश्विनमासः – शारदापूजा

........................................ ।

www.thearyasamaj.org



4. | कार्तिकमासः – दीपावली |

.................................................................................................. ।

5. | श्रावणपूर्णिमा – संस्कृतदिनम् |

.................................................................................................. ।

II. आवरणे दत्तयोः पदयोः उचितेन विभक्तिरूपेण रिक्तस्थानं पूरयन्तु–

1. (सर्वाः रथयात्राः) .................................. जगन्नाथरथयात्रा विशिष्टा ।
2. (सर्वे उत्सवाः) .................................. दीपावली अद्वितीया ।
3. (सर्वे कार्यक्रमाः) .................................. उद्घाटनकार्यक्रमः सुन्दरः ।
4. (सर्वाः सञ्चिकाः) .................................. एषा सञ्चिका मुख्या ।
5. (सर्वाणि शास्त्राणि) .................................. वेदान्तशास्त्रं प्रमुखम् ।

III. लिङ्गानुगुणं सप्तमीविभक्तिरूपाणि त्रिषु वचनेषु लिखन्तु–

तत् (पुं०) .................. .................. ..................
(नपुं०) .................. .................. ..................
(स्त्री०) .................. .................. ..................

किम् (पुं०) .................. .................. ..................
(नपुं०) .................. .................. ..................
(स्त्री०) .................. .................. ..................

सर्व (पुं०) .................. .................. ..................
(नपुं०) .................. .................. ..................
(स्त्री०) .................. .................. ..................

भवत् (पुं०) .................. .................. ..................
(नपुं०) .................. .................. ..................
(स्त्री०) .................. .................. ..................

www.thearyasamaj.org



मनुष्यः – ............ ............ ............
माला – ............ ............ ............
नारी – ............ ............ ............
जलम् – ............ ............ ............

IV. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

1. सप्तमी / एकवचनम् [अध्यापके] अकारान्तः / पुंलिङ्गः

2. ............ / ............ [अध्यापकयोः] ............ / ............

3. ............ / ............ [अध्यापकेषु] ............ / ............

4. ............ / ............ [छात्रायाः] ............ / ............

5. ............ / ............ [छात्रयोः] ............ / ............

6. ............ / ............ [छात्रासु] ............ / ............

7. ............ / ............ [अङ्कन्याः] ............ / ............

8. ............ / ............ [अङ्कन्योः] ............ / ............

9. ............ / ............ [अङ्कनीषु] ............ / ............

V. रूपाणि लिखन्तु–

| | | एक० | द्वि० | बहु० |
|---|---|---|---|---|
| (क) | करः | करे | करयोः | करेषु |
| | पिञ्जः | ............ | ............ | ............ |
| | कोणः | ............ | ............ | ............ |
| | हस्तः | ............ | ............ | ............ |
| | कर्पूरः | ............ | ............ | ............ |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| (ख) | वेला | वेलायाम् | वेलयोः | वेलासु |
| | छाया | ................ | ................ | ................ |
| | पिपीलिका | ................ | ................ | ................ |
| | नौका | ................ | ................ | ................ |
| | शृङ्खला | ................ | ................ | ................ |
| (ग) | नर्तकी | नर्तक्याम् | नर्तक्योः | नर्तकीषु |
| | कर्तरी | ................ | ................ | ................ |
| | कर्कटी | ................ | ................ | ................ |
| | सूची | ................ | ................ | ................ |
| | वार्तकी | ................ | ................ | ................ |
| (घ) | अरण्यम् | अरण्ये | अरण्ययोः | अरण्येषु |
| | बीजम् | ................ | ................ | ................ |
| | वृत्तम् | ................ | ................ | ................ |
| | पुष्पम् | ................ | ................ | ................ |
| | मुकुलम् | ................ | ................ | ................ |
| (ङ) | भवान् | ................ | ................ | ................ |
| | भवती | ................ | ................ | ................ |
| | भवत् | ................ | ................ | ................ |

VI. रिक्तं स्थानं पूरयन्तु–

| | एक० | द्वि० | बहु० |
|---|---|---|---|
| 1. | नरे | नरयोः | नरेषु |
| 2. | अजायाम् | ................ | अजासु |
| 3. | ................ | दर्व्योः | दर्वीषु |
| 4. | नयने | ................ | नयनेषु |
| 5. | ................ | घटयोः | घटेषु |
| 6. | एडकायाम् | एडकयोः | ................ |
| 7. | सौदामिन्याम् | ................ | सौदामिनीषु |
| 8. | ................ | सर्वयोः | सर्वासु |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 9. | कस्मिन् | कयोः | ........ |
| 10. | प्रदीपे | ........ | प्रदीपेषु |
| 11. | विमाने | विमानयोः | ........ |
| 12. | ........ | वत्सयोः | वत्सासु |
| 13. | सूच्याम् | ........ | सूचीषु |
| 14. | भवति | भवतोः | ........ |
| 15. | ........ | छत्रयोः | छत्रेषु |
| 16. | मयूरे | मयूरयोः | ........ |
| 17. | ........ | घोटक्योः | घोटकीषु |
| 18. | ललाटे | ........ | ललाटेषु |
| 19. | जनन्याम् | जनन्योः | ........ |
| 20. | ........ | हंसयोः | हंसेषु |

VII. उचितपदैः रिक्तस्थानानि पूरयन्तु–

नारिकेले, लतायाम्, जले, नीडेषु, शाखासु, विद्यालये, ग्रामेषु

1. खगाः ....नीडेषु.... तिष्ठन्ति ।
2. छात्राः ................ पठन्ति ।
3. ................ पुष्पं विकसति ।
4. ................ जलम् अस्ति ।
5. ग्रामीणाः ................ वसन्ति ।
6. मीनाः ................ तरन्ति ।
7. वानराः ................ उपविशन्ति ।

VIII. उचितपदरूपेण रिक्तस्थानं पूरयन्तु–

1. आकाशे मेघाः सन्ति । (आकाशः)
2. विद्यार्थिनी ................ उपविशति । (कक्षा)
3. नौकाः ................ चलन्ति । (नद्यः)
4 ................ शिक्षायाः प्रचारः भवति । (देशः)
5 व्याघ्राः ................ निवसन्ति । (वनम्)
6 ................ मनुष्याः उपविशन्ति । (नौकाः)
7 ................ फलानि न सन्ति । (वृक्षौ)

www.thearyasamaj.org



IX. एकवचनरूपाणि लिखन्तु–

1. गायिकासु ......गायिकायाम्......
2. नरयोः ..............................
3. हंसेषु ..............................
4 पिकयोः ..............................
5. मालयोः ..............................
6. मालाकारीषु ..............................

X. बहुवचनरूपाणि लिखन्तु–

1. तस्याम् ......तासु......
2. सौदामिन्याम् ..............................
3. छायायाम् ..............................
4. अरण्ययोः ..............................
5. पाटले ..............................
6. बीजयोः ..............................

XI. विभक्तिं वचनं च निर्दिशन्तु–

| | | | |
|---|---|---|---|
| 1. | तासु | सप्तमी | बहुवचनम् |
| 2. | चरणाय | .............. | .............. |
| 3. | हृदये | .............. | .............. |
| 4. | लतायाम् | .............. | .............. |
| 5. | पात्रेण | .............. | .............. |
| 6. | कासु | .............. | .............. |
| 7 | तैः | .............. | .............. |

XII. सप्तमीविभक्त्यन्तपदानि रेखाङ्कनेन पृथक्कुर्वन्तु–

कोषे, कङ्कतेषु, वृषभौ, सन्दंशिकायाम्, तासु, एतानि, सर्वस्याम्, भूगोले, तैलस्य, भूतलात्, तैलेषु, एतस्मात् ।

www.thearyasamaj.org

# Teach Yourself Samskrit

पञ्चमी दीक्षा
व्युत्पादिनी

चतुर्थी दीक्षा
काव्यावगाहनी

तृतीया दीक्षा
काव्यावतरणी

द्वितीया दीक्षा
व्यवहारावगाहनी

प्रथमा दीक्षा
व्यवहारावतरणी

संस्कृतस्वाध्यायः

राष्ट्रिय संस्कृत संस्थानम्
नव देहली